
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

3050

॥अथतर्कप्रकाशप्रत्यक्षखंडप्रारंभः॥

Acc. NO. ~~3050~~ M-1855
Title - न्यायसिद्धान्तमञ्जरी - टीका. (प्रत्यक्षखण्ड)
टी. :- न्यायसिद्धान्तमंजरीदीपिका = तर्कप्रकाश.
Author - टी. :- श्रीकण्ठशर्मन्.
Date - ?
Subject - न्याय.
folio - 73.
Xerox - 146.

पन्नमिति विघ्नध्वंसद्वारा समाप्तिं प्रति मंगलं हेतुरिति संप्रदायः ॥ न चास्तु ॥ मंगलं विनापि नास्ति
क ग्रंथसमाप्तेर्न तत्र तद्धेतुः ॥ न च चरमवर्णरूपायाः चरमवर्णध्वंसरूपायावा समाप्तेरा
कारणनिष्ठतया तन्निष्ठस्य मंगलस्य तज्जन्यविघ्नध्वंसस्य वा अधिकरणतया कारणत्वासं
भवेन स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्र
त्याश्रयतासंबंधेनात्मनिष्ठप्रत्यासत्त्या मंगलस्य हेतुतायावक्तव्यतया जन्मांतरीयमंगला
नुमानान्न व्यभिचार इति वाच्यम् ॥ जन्मांतरीयसमाप्तिमुद्दिश्य क्रियमाणस्य तदनाचरणात् ॥
प्रारीप्सितसमाप्तेरेव तत्फलकत्वं कारीरिवत् ननु जन्मांतरीयसमाप्तेरपि पुत्रेष्टिस्थले
तु पुत्रमात्रफलकत्वश्रवणादामुष्मिकैहिकसाधारणफलकत्वं तस्मादात्मनिष्ठप्रत्या
सत्त्या कारणत्वे जन्मांतरीयसमाप्तिमुद्दिश्यापि मंगलकरणापत्तेः ॥ स्वप्रतियोगिचर
मवर्णावच्छेदकतासंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति स्वोत्पत्त्यवच्छेदकजातीय

तासंबंधेन शरीरनिष्ठप्रत्यासत्त्या तत्कारणताया अवच्छेदकत्वं वाच्यं तथा नास्तिकशरीरे ऽवच्छेदकतया मंग
लस्य तज्जन्यविघ्नध्वंसस्य चाभावेन व्यतिरेकव्यभिचारात् कारणत्वासंभवः ॥ ननु विघ्नस्थ
लीयसमाप्तित्वमेव तज्जन्यतावच्छेदकं तत्र च न व्यभि[illegible]रः ॥ विघ्नस्थलीयत्वं च विघ्नवज्जातीयश
रीरकर्तृकत्वं मंगलजन्यविघ्नध्वंसविशिष्टत्वं वा विशिष्टत्वं च स्वावच्छेदकावच्छिन्नप्रतियोगिक
त्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन जन्मांतरीयमंगलजन्यविघ्नध्वंसस्य च स्वा
वच्छेदकावच्छिन्नप्रतियोगिकत्व[illegible]स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन ना
स्तिकसमासाभावेन तस्याः कार्यतावच्छेदकानाक्रांतत्वादिति चेन्न प्रथमे समासव्यवहितपूर्व
विघ्नासत्त्वे न तस्य विशेषणत्वासंभवात् ॥ उपलक्षणत्वे तु प्रमत्तानुष्ठितसमासेरपि उत्सत्स्य
मानविघ्नवज्जातीयशरीरकर्तृकतया व्यभिचारस्य दुर्वारत्वात् ॥ अन्यविधस्य च विघ्नवज्जा
तीयशरीरनिष्ठकृतिजन्यत्वरूपस्य तत्कर्तृकत्वस्य दुर्वचत्वात् ॥ द्वितीये तु समाप्त्यव्यवहितपू
र्वक्षणं तत्तद्व्यक्तित्वेन निवेश्यैवाव्यवहितोत्तरत्वस्य वक्तव्यतयाऽननुगमात् ॥ कारणस्य

5

१ मा

श्रीगणेशायनमः॥ ॥श्रीकुलदेवतायैनमः॥ ॥संध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समा
लोकिते रोषं मा निनि निहिथा स्त्वदपरा नान्यास्ति वंद्या मम॥ किंतु त्वामहमानमामि मनसि ध्याः
त्वा तवैवाकृतीरित्थं हर्षितशैलराजतनयादृष्टः शिवः पातु नः॥१॥ सिद्धांतगूढवर्त्मैकभाव
नापरिशीलिना॥ श्रीकंठनिर्मितासेयं कृतिराजत्नुतां मुदम्॥२॥ सत्येकस्मिन्नपि बाधके बा
धकसहस्रस्याप्यकिंचित्करत्वेन प्रतिबंधकाभावस्यावश्यापेक्षितत्वतया प्रकृतग्रंथसमाप्तिप्रतिबं
धकदुरितरूपविघ्नविघातायकृतं भगवन्नमस्यात्मकं मंगलं शिष्यशिक्षार्थमादौ निबध्नाति॥ प्रणम्येति॥
मंगलस्य समाप्तिं प्रति विघ्नध्वंसद्वारा हेतुत्वमिति सिद्धांतस्थितिः॥ तत्रानन्यथासिद्धनियतपूर्ववर्ति
त्वरूपकारणत्वघटकानन्यथासिद्धत्वांशग्रहे व्यापकत्वरूपनियमांश

ग्रहे वास्वस्वव्याप्येतरयावत्कारणसत्वे यत्सत्वेऽवश्यं यत्सत्वं यदभावेऽवश्यं यदभाव इति निय
घटितयोर्नियतान्वयव्यतिरेकयोः कारणत्वेमानाभावेपि अन्वयव्यतिरेकाभ्यां विशिष्टतद्रूप
कारणत्वग्रहेऽतिरिक्तकारणत्वग्रहे वा तयोर्हेतुतया तत्सहकृतप्रत्यक्षप्रमाणगम्यत्वस्य
यद्यपि नात्र संभवः मंगलसत्वेपि समाप्त्यसत्वान्मंगलाभावेपि समाप्तेश्चैतान्वयव्यतिरेक
व्यभिचारात् तथापि समाप्तिफलकत्वे लाघवमिति लाघवज्ञानसहकृतं शिष्टाचारविष
यत्वहेतुकं सफलत्वानुमानमेवात्र मानम् । जन्मांतरीयमंगलसंदेहेन व्यतिरेकव्यभिचार
संशयेपि ग्राह्यसंशयस्यानुमित्यप्रतिबंधकतया समाप्तिकारणत्वेनुमिते समाप्तिरूपकार्येण
जन्मांतरीयमंगलानुमानान्न व्यतिरेकव्यभिचारः मंगले सति समाप्त्यभावश्च तत्र मंगलाना
द्यपविघ्नसत्वात् अनंतरोत्पन्नविघ्नसत्वाद्वा इति नान्वयव्यभिचारोपि ॥ अत एव तच्छून्यमध्ये
पि मंगलमाचरंति । एवं चाशुचिः । नास्तिकः कालांतरभाविफलजनकत्वं व्यापारं विनाऽनुप

॥३॥

श्रु २

कार्यतावच्छेदकत्वानभ्युपगमाच्च ॥ अन्यथा काशीमरणस्यापि स्वविशिष्टमुक्तिं प्रति हेतुत्वस्य सु
वचतया काशीमरणान्मुक्तिरिति श्रुतेः हेतुत्वपरतयोपपत्तौ प्रयोजकत्वपरत्वोपवर्णनस्या
संगत्यापत्तेः ॥ न च तमेव विदित्वेति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यहेतुत्वप्रतिपादनेन तस्य
साक्षात्कारणत्वासंभवात् श्रुतेः प्रयोजकपरत्वमेवेति वाच्यं ॥ तावतापि तत्त्वज्ञानद्वाराहे
तुत्वस्यादुष्टत्वात् ॥ विघ्नध्वंसद्वारा समाप्तौ मंगलस्येव ॥ न च स्वजन्यतत्त्वज्ञानविशिष्टमु
क्तिं प्रति काशीमरणस्य हेतुत्वे अन्यं प्रती साध्यन्यथासिद्ध्या न तन्मुक्तिहेतुरिति वाच्यम् ॥
स्वजन्यविघ्नध्वंसविशिष्टसमाप्तिं प्रति मंगलस्य हेतुत्वेऽपि तस्याः दुर्वारत्वात् ॥ तस्माद्यथा
सिद्धतया न मंगलं समाप्तिं प्रति हेतुः ॥ एतेन काशीमरणविशिष्टमुक्तौ काशीमरणस्य हेतु
त्वे इष्टापत्तिर्गततत्त्वज्ञानमद्वारीकृत्य न तद्धेतुरिति सूचनायैव प्रपंचस्याः प्रयोजकत्वपरत्व
मिति निरस्तम् ॥ तथापि तद्धेतुसमाप्तिहेतुताबोधकप्रत्यक्षश्रुत्यभावेनोक्तदिशा मंगलेऽना

॥३॥

थासिद्धेर्दुर्वारत्वादिति। न च निर्विघ्नं समाप्यतामिति कामनया तदाचारात् समाप्तेः तत्फलत्वमिति वाच्यम्। ना
गृहीतविशेषणान्यायेन विघ्नध्वंसकामनाया आवश्यकत्वात्तस्यैव तत्फलत्वात्। न च यदुद्दिश्य यत्
क्रियते तत्तत्र हेतुः। गचैत्यवंदनादेरपि स्वर्गफलकत्वापत्तेः। तत्र तत्कामीभूतेन [illegible] नस्य भ्रमतया
न तथेति चेदत्रापि समाप्तिजनकत्वज्ञानस्य भ्रमत्वमादाय विवादसंभवात्। पाकप्रकृतिका
ले तत्तिकामनावत् उभयत्रेष्टसाधनताज्ञानेन समाप्तिकामनाया अप्युपपत्तेरिति न किंचि
देतत्। अत एव नास्तिकसमाप्तिप्रतियोगिव्यावृत्तं चरमवर्णवैजात्यं स्वीकृत्य विजातीयचरमव
र्णध्वंसरूपसमाप्तिं प्रति मंगलं हेतुरिति निरस्तम्। पुरुषविशेषजन्यतावच्छेदकजातिव्याप्या
नंतजातिकल्पने प्रमाणाभावात्। अन्यत्र क्लृप्तसाधन्यथासिद्धत्वाच्च। तस्माद्विघ्नध्वं
स एव मंगलस्य फलम्। समाप्तिस्तु अन्यत्र क्लृप्तसामान्यसाम[ग्र्या] एवोपपद्यत इति प्रा
हुरिति कृतं पल्लवितेन। अयं मन्तु ह्लष्टः अहमस्मात्परः कृष्ण इति ज्ञाते विशेष एव नम
स्कारपदवाच्यस्तत्कुतो लभ्यत इत्यत आह। परमात्मानमिति। परमत्वं च निरस्ताज्ञानादि

ज्ञा० ३

॥४॥

मत्वेन सर्वोत्कृष्टत्वं तथा च समानसंवित्संवेद्यतया सर्वस्मिन्नुतरपेक्षयाऽपकृष्टत्वे ज्ञाते सर्वा
नःपातिनि स्वस्मिन्नपि अपकृष्टत्वज्ञानान्नमस्कारनिर्वाह इति भावः॥ न त्वत्र परममह
त्परिमाणवत्वं परमत्वं तादृशपरिमाणविशिष्टात्मत्वस्य स्वापेक्षयापकृष्टेपि सत्वेन
नमस्कार्यतावच्छेदकत्वाभावात्॥ यद्यपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति
नियमेन सुखसमवायीकारणतावच्छेदकतयासिद्धस्यात्मत्वस्य ईश्वरे स्वीकारे सुखो
त्पत्त्यापत्तेः॥ तादृशनियमाभावेपि चासंताजनकभावेन्नरूपैकैवकारणतायाव्याप्य
त्वादीश्वरे आत्मत्वजातिसत्वे प्रमाणाभावस्तथाप्यात्मपदशक्यतावच्छेदकतयाऽऽ
त्मत्वजातिस्तत्साधारणी सिध्यति कार्यतावच्छेदकतया कारणतावच्छेदकतया च
जातिसिद्धिवदसति बाधके शक्यतावच्छेदकतयापि जातिसिद्धेरदुष्टत्वात् असति बा
धके इति विशेषणात् च नाभावपदशक्यतावच्छेदकतयाभावत्वादिजातिसिद्धिः जन्यभा ॥४॥

वत्वावछिन्नकारणतानिरूपितकार्यतावछेदकतयाध्वंसत्वादेरपिजातित्वापत्तितद्विशे
षणस्य भ॰ वतोप्यावश्यकत्वात्हिंसाहुस्तन्निरासं ॥ तथासति विभुपदशक्यतावछेदके
तया विभुत्वमपिजातिः सिध्येत् ॥ न चेष्टापत्तिः एवं विधानंतजातिकल्पने प्रमा
णाभावादिति कारणतावछेदकतया कार्यतावछेदकतया जातिसिद्धिरित्येवांगी
करणीयम् ॥ एवं च सुखदुःखसमवायीकारणतावछेदकात्मत्वजातेरीश्वरसा
धारण्येमानाभावएव ॥ वस्तुतस्तु ॥ नहि शक्यतावछेदकतया जातिसिद्धिरिति ब्रूमो ये
नोक्तानुपपत्तिरुद्भाव्येत ॥ अपितु सुखसमवायीकारणतावछेदकत्वेन जीवात्मनि
सिद्धस्यात्मत्वस्यश्रौतात्मव्यवहारबलेन तत्संबंधमात्रमीश्वरे कल्प्यते नित्यस्य सादिनि
यमस्य॰ चाप्रयोजकत्वात् ॥ अदृष्टादिरूपसहकार्यंतराभावादेवकार्याभावस्योपपन्न
त्वात् ॥ असंताजनकव्यावृत्तरूपेणैवकारणताकल्पने च प्रमाणशून्यत्वप्रयुक्तम् ॥ प्रकृते

॥५॥

तृ श्रौतात्मव्यवहारस्यैव प्रमाणत्वेनासंतानजनकसाधारणरूपेणापि कारणत्वकल्पने श्रुति
विरहात् ॥ न च सुखसमवायीकारणतावच्छेदकं द्रव्यत्वमेवातिप्रसक्तत्वेपि आत्मत्वस्यै
वावच्छेदकत्वे बाधकाभावादिति वाच्यम् ॥ कारणतानतिप्रसक्तस्यैव कारणतावच्छेद
कतया गगनादिषु कारणत्वसंबंधकल्पने गौरवात् ॥ अन्यथा सत्वेनापि तु हेतुतापत्तेः स
भवति व्याप्यधर्मे कारणतावच्छेदके व्यापकधर्मेणान्यथासिद्धो अतिप्रसक्तेरेव बीजत्वा
त्तु न स्यात्तु द्रव्यत्वेपि तुल्यत्वात् आत्मत्वेपि श्रौतात्मव्यवहारबलादीश्वरेपि कारणत्वसं
बंधस्य कल्पनीयतया अतिप्रसक्तेरेवात् इत्थं चात्मपदशक्यतावच्छेदकत्वमपि तस्यै
वेति सारम् ॥ नवीनास्तु ॥ नष्ट एव पूर्वदेशसंयोगे उत्तरदेशसंयोगोसस्याउत्तरदेशसं
योगे पूर्वदेशसंयोगः प्रतिबंधको वाच्यः तत्रैतावत् न त्वपूर्वदेशावमुत्तरदेशे भिन्नत्वं
उत्तरदेशाभिन्नजतुरूपपूर्वदेशसंयुक्तस्यैवेषोरुत्तरदेशसंगात् ॥ किं त्वात्मत्वं तद्व त
था चात्मनिरूपितत्वविशिष्टसंयोगमात्रेण प्रतिबंधकत्वे सायातं एवं च तत्प्रतिबंधकता

भा०

॥५॥

वच्छेदकको टिप्रविष्टत्वेनात्मत्वजातिसिद्धिः विनिगमनाविरहेण तस्याः ईश्वरसाधारण्यम
पि ॥ न चैवमेकस्मिन्नीश्वर एव सा जातिरास्तां न त्वनेकेषु जीवात्मस्विति वाच्यम् ॥ एकव्यक्ति
कत्वेन तस्य जातित्वासंभवात् ॥ तादृशधर्मस्वीकारेपि च प्रत्येकं जीवमादाय विनिगमना
विरहतादवस्थ्यात् ॥ न चात्मनिरूपितत्वविशिष्टसंयोगत्वेन प्रतिबंधकत्वे आत्मनिरूपि
तत्वसंयोगत्वयोर्विशेष्याभावे विनिगमनाविरहेण विजातीयसंयोगत्वेनैव तत्प्रतिबंध
कत्वं स्यात् तथा च तत्प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वाच्चात्मत्वजातिसिद्धिरिति वाच्य
म् ॥ संयोगसंबंधेनात्मनोपि विनिगमनाविरहेण प्रतिबंधकत्वस्य दुर्वारत्वात् ॥ न चैवं
तज्ज्ञातेरीश्वरस्य गगनादिष्वपि सत्वप्रसंग इति वाच्यम् ॥ गगनादीनामीश्वराऽनतिरिक्त
त्वेन तत्सारूप्येपि क्षतिविरहादिति पुनर्निर्व्यलीकः पंथा इति प्राहुः ॥ ध्रुवमेति ॥ क्रांत
पदस्य चक्रियतद्भूसनेनान्वयः ॥ नमस्कारसिद्धेर्नमःपदेनैव संभवेपि प्रणामेषु कर्त्त
व्यापेक्षया पूर्वभावे दर्शितेशिष्याअप्येवं कुर्युरिति शिष्यशिक्षार्थमेव क्रांतेन निर्देशः ॥ अत्र

स्य. २

॥६॥

अत्रप्रशब्देनभक्तिश्रद्धातिशयोद्योत्यते॥ मुक्तिमुक्ताभिरित्यनेनयुक्तीनांमुक्तासादृश्यप्रद
र्शनेननिर्दोषत्वंमंजरीपदेनचस्वीयवाक्यावलीनांकोमलत्वंसूचितम्॥ प्रवृत्तिसा
मान्यंप्रतिरूपसाधनताज्ञानस्यहेतुत्वात्प्रयोजकज्ञानंविनाकथमेतद्ग्रंथेप्रवर्त्तता
मित्यतआह परेहेत्यादि॥ मननोपायमात्मनस्तत्वज्ञानं॥ निखिललोकविमोक्षमुख्यो
पायमामनंतीतियोजना॥ तथाचसकलकामनाविषयीभूतापवर्गजनकतत्वज्ञानप्रयो
जकतयाएतद्ग्रंथेनप्रवृत्त्यनुपपत्तिरितिभावः॥ मोक्षमुख्योपायत्वंचमुक्त्यभावप्रयोज
कीभूताभावप्रतियोगित्वं॥ केचित्तु॥ काशीमरणादितोपिश्रवणानधिकारिस्त्रीशूद्रा
दिलोकस्यमुक्तिसंभवेनतत्वज्ञानाभावस्यतदभावेप्रयोजकताभावात्॥ लोकपदंश्रव
णाधिकारिपरतयाव्याख्येयम्॥ तथाचश्रवणाधिकारिलोकमुक्त्यभावेतत्वज्ञानाभा
वस्यप्रयोजकत्वलभ्यतेनोक्तदोषइतिव्याचक्षते॥ तदसत्॥ श्रवणाधिकारीब्राह्मणा ॥६॥
दीनामपिकाशीमरणादितोपिमुक्तिसंभवेनतथाविवक्षितेप्यनुपपत्तेः॥ जागरूकत्वात्

स्यात्तत्वज्ञानेमोक्षसुखोपायत्वं स्याव्यवहितोत्तरक्षणोत्पत्तिकमुक्त्यभावप्रयोजकीभूताभावप्र
तियोगित्वमेववक्तव्यं तत्र च नोक्तानुपपत्तिः ॥ एवं च लोकपदं यथाश्रुतमेव ॥ अत एव का
शीमरणजन्यमुक्तेर्मननोपायकतत्वज्ञानाजन्यत्वात् ॥ विमोक्ष इति ॥ काशीमरणाप्र
योज्यमोक्षइत्यर्थ इति निपुणतरैमूहनीयम् ॥ अत्र च स्वसमानाधिकरणदुःखप्राग
भावासमानकालीनदुःखध्वंसत्वं मुक्तित्वम् ॥ दुःखध्वंसस्येदानीमपि सत्वेनास्मदा
दीनामपि मुक्तित्वापत्तिवारणाय कालीनांतम् ॥ मुक्त्यात्मकदुःखध्वंसस्यास्मदीयदुः
खप्रागभावसमानकालीनत्वाद्वामदेवशुकादीनामप्यमुक्तत्वप्रसंगात्स्वसमानाधि
करणेति प्रागभावविशेषणम् ॥ न च दुःखासमानकालीनत्वेनैव सामंजस्यात्प्रागभा
वेति व्यर्थमिति वाच्यम् ॥ यथासन्निवेशेन वैयर्थ्याभावात् तथाप्यनतिप्रयोजनकत्वे
स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वमेव मुक्तित्वमिष्यास्तां तल्लक्षणं ॥

॥७॥

ननुस्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसस्यमुक्तित्वस्वरूपत्वेतस्यतत्त्वज्ञान
जन्यतावच्छेदकत्वानुपपत्तिः॥स्वपदस्यदुःखध्वंससामान्यपरत्वेपुरुषांतरीयदुःखध्वं
ससमानाधिकरणदुःखासमानकालीनदुःखध्वंसस्येदानीमप्रसिद्ध्यापत्तेः॥स्वपद
स्यतत्तद्दुःखध्वंसपरत्वेचसामान्यतः मुक्तित्वस्यैक्याभावात्मुक्तित्वावच्छिन्नंप्रति
तत्त्वज्ञानत्वेनहेतुतायामसंभवदुक्तिकत्वापत्तेरितिचेन्न॥स्वसामानाधिकरण्यका
लिकविशेषणतोभयसंबंधेनदुःखवान्यस्तद्भिन्नदुःखध्वंसत्वस्यैवमुक्तित्वरू
पत्वात्॥अत्रचस्वपदस्यपरिचायकतयानोक्तविकल्पावसरइति॥अत्रचज्ञानादी
नांक्षणिकत्ववारणायविभुसमवेतयोग्यविशेषगुणनाश्यतावच्छेदकंप्रतिस्वोत्तरो
त्पन्नविशेषगुणत्वेननाशकतयाततएवमुक्त्यात्मकदुःखध्वंससंभवान्नतत्त्वज्ञा
नत्वेनहेतुतायांमानाभावइतियदिविभाव्यतेतदादुरितवद्भिन्नदुरितध्वंसत्वमेवमुक्ति

॥७॥

त्वमवसेयम् ॥ न चाग्नेर्दुरितानुत्पादकत्वेऽपि दुरितध्वंसत्वस्यार्थसमाजग्रस्तत्वा
त्कथं तत्त्वज्ञानजन्यतावच्छेदकत्वमिति वाच्यम् ॥ प्रमाणाभावस्यैवार्थसमाजग्रस्तध
र्मस्य कार्यतानवच्छेदकत्वे बीजतया प्रकृते च मुक्तितत्त्वज्ञानकार्यकारणभावबोध
कवेदस्यैव बीजत्वेनार्थसमाजग्रस्तत्वेऽपि कार्यतावच्छेदकत्वे बाधकाभावात् ॥ नच
सुखदुःखाभावयोरन्यतरस्यैव पुरुषार्थत्वेन मुक्तेरपुरुषार्थत्वप्रसंगइति वाच्यम् ॥ बलवद्द्वेष
विषयत्वाभाववत्त्वेन पुरुषार्थत्वं दुःखाभाववद्बलवद्दुःखजनकदुरितध्वंसेऽपि संभवात् ॥ ननु
तथापि काशीमरणान्मुक्तिरिति वाक्येन काशीमरणस्यापि साक्षान्मुक्तिहेतुत्वप्रतिपाद
नात् ॥ मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुत्वे व्यभिचार एवेति चेन्न ॥ तमेव विदित्वाति
मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यपूर्वभावे दर्शि
ते काशीमरणस्य तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमित्येव तदर्थात् ॥ सयुक्तिकं चैतत्स

स्या०६

॥८॥

अन्यथा तयोः परस्परजन्यमुक्तौ व्यभिचारेणोभयत्राप्यव्यवहितोत्तरत्वनिवेशे गौरवात्॥ न च का-
शीमरणस्य तत्त्वज्ञानं प्रति हेतुत्वेपि श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणायाव्यवहितोत्त-
रत्वनिवेशोऽविशिष्ट इति वाच्यं॥ गंगामरणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय श्रवणादि
जन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्याभवतो वश्यकत्वात्॥ श्रवणादिजन्यतत्त्व-
ज्ञाने व्यभिचारवारणाय परं काशीमरणजन्यतावच्छेदककोटावेवाव्यवहितोत्तरत्वनि-
वेश इति तन्निवेशस्यैकधैव संभवात्॥ मं वस्मते तु काशीमरणजन्यमुक्तौ व्यभिचारवारणा-
य तत्त्वज्ञानजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशः एवं तत्त्वज्ञानजन्यमुक्तौ व्यभिचा-
रवारणाय काशीमरणजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेश इत्युभयत्राव्यवहि- व३
तोत्तरत्वनिवेशावश्यकत्वेनातिगौरवादिति॥ ननु तथापि उभाभ्यामेव पक्षाभ्यां यथा खे
खेचरपक्षिणां गतिः॥ तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिरित्यनेन कर्मणामपि मुक्ति-

॥८॥

हेतुत्वप्रतिपादनात् कथं तत्त्वज्ञानस्यैव मुक्तिहेतुत्वमिति चेन्न । तस्य तत्त्वज्ञानप्रतिबंध
काधर्मध्वंसद्वारा तत्त्वज्ञान एवोपक्षयात् । न तु मुक्तिं प्रत्येव साक्षात्तस्य हेतुता । नान्यः
पंथा विद्यतेऽयनायेति श्रुतिविरोधात् । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञे
न दानेन तपसानाशकेनेति श्रुतिविरोधाच्च । किंच यस्याश्रमविहितकर्मण एव हेतु
त्वे गृहस्थस्यामुक्तत्वप्रसंगः । कर्मणैव हि संसिद्धिमास्थिता जनकादयः । श्राद्धकृत्स
त्यवादी च गृहस्थोपि हि मुच्यत इति गृहस्थस्यापि मुक्तत्वश्रवणात् । गृहस्थाश्रमे वि
हितकर्मण एव हेतुत्वे च यतेरमुक्तत्वप्रसंगात् । न हि मुक्तौ वैजात्यमस्ति येनोभयोरपि
हेतुत्वमुपपादनीयमिति । अत एव काशीमरणस्य कर्मणां वा साक्षान्मुक्त्युपायत्वनिरा
सायमोक्षमुख्योपायत्वमित्यत्र मुख्यत्वमुक्तम् । स्वेतरासाधारणकारणकभिन्नमित्यर्थः । मोक्षार
मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणत्वं चात्रासाधारणकारणत्वं तेन प्रागभावादी

हेतु २

नामपि तत्त्वव्यक्तित्वेन हेतुत्वेपि न क्षतिरिति दिक्॥ नन्वात्मा शरीरादिभ्यो भिन्नः इत्याकारकं तत्त्व
ज्ञानमिदानीमपि संभवति तत्कथं न मुक्तिरित्यत आह॥ मननोपायमिति॥ मननं उपायो
यत्रेत्यर्थः॥ तथा च श्रवणमनननिदिध्यासनप्रयोज्यतत्त्वज्ञानमेव मुक्तिहेतुः तच्च नेदा
नीं संभवतीति भावः॥ यद्यपि श्रवणोपायमित्येव वक्तुमुचितं तथापि मकारानुप्रासव
शात् मननोपायमित्युक्तम्॥ युक्तिभिरनुचिंतनं मननं साधकबाधकप्रमाणोपन्यास
श्च युक्तिः॥ श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति स्मरणात्॥ श्रुतस्यार्थस्य
नैरंतर्येण दीर्घकालमनुसंधानं निदिध्यासनमिति बोध्यम्॥ तदिति तत्त्वज्ञानमित्यर्थ॥
नीलुपटीसुंदरः सच मानीसादीस वेनाम्ना न नीलाद्युपस्थापकत्वं किंतु मुख्यविशेष्य
स्यैवेत्यत अत्रापि पूर्वोपस्थिततत्त्वज्ञानस्यैवोपस्थापनात् न तु तन्मननमित्यर्थः॥
मननस्य मुख्यविशेष्यतया पूर्वमनुपस्थितत्वेन तद्बोधासंभवात् इ संबधेयम्॥ प्रमाणाधी

नमिति॥ प्रमाणज्ञानप्रयोज्यमित्यर्थः॥ श्रवणादिप्रयोज्यमात्मनि इतरपदार्थभिन्नत्वज्ञानमेव
हितत्वज्ञानं तच्च नेतरपदार्थतत्त्वज्ञानं विना तच्च न प्रमाणज्ञानं विना प्रमेयव्यवस्थितेः प्रमा
णज्ञानाधीनत्वादिति प्रमाणनिरूपणमावश्यकमिति भावः॥ यद्वा तत्त्वज्ञानस्य मनन
द्वारा प्रमाणाधीनत्वसूचनाय मननोपायमित्युक्तम्॥ वस्तुतस्तु॥ बुद्धिस्थव्यवहितोपस्थि
तविशेषणस्यापि तच्छेद नपरामर्शनात् अव्यवहितमुख्यविशेष्यमात्रोपस्थाप
कत्वनियमस्य औत्सर्गिकत्वं तात्पर्यस्य नियामकत्वाच्च नोक्तातिप्रसंगः एवं च तत्त्वमनन
नं चेत्यर्थः॥ साधकबाधकप्रमाणोपन्यासयुक्तिभिरनुचिंतनरूपमननस्य प्रमाणज्ञानं
विनासंभवादिति भावः॥ प्रमाणं निरूप्य तद्वृत्तिलक्षणस्वरूपप्रामाण्यादिप्रकारकत्वं
माननिरूपणविषयीभूतं प्रमाणमित्यर्थः॥ तत्रेति॥ प्रमाणनिरूपणीयइत्यर्थः॥ प्रमायाः
करणमिति॥ अत्र प्रमाणपदवाच्यत्वं लक्ष्यतावच्छेदकं प्रमाकरणत्वं च लक्षणं नातः प्रमा
पात्वस्य प्रमाकरणत्वरूपत्वेन लक्षणलक्ष्यतावच्छेदकयोरभेदापत्तिः॥ यथा च तयोरभे

॥१०॥

रे नैष्टापत्तिस्तथापि वेचनीयमुपरिष्टात् ॥ ननु प्रमाकरणमिति विहाय प्रमायाः करणमित्युक्तौ
किं बीजमिति चेन्न ॥ लक्षणवाक्योंहत्रार्थस्थ्या + स्यबोधस्तस्यैव लक्षणत्वेन प्रमानिरू
पितकरणत्वस्य लाभायतथोक्तेः ॥ अन्यथा तत्पुरुषे पूर्वपदलक्षणया प्रमासंबंधिनि त्वं
करणमित्यर्थलाभे तु नरमेशानुमाने हेतौ वैयर्थ्यस्य दुर्वारत्वात् गुरुत्वाच्च लक्षणवाक्य
तात्पर्यविषयीभूतार्थस्यैव लक्षणत्वोपगमेन च प्रमानिरूपितकरणत्व एव तात्प
र्येण तस्यैव हेतुत्वोपपादने तु प्रयासगौरवमिति ॥ वस्तुतस्तु ॥ प्रमाकरणमित्यभे
देनान्वयभ्रमनिराकरणाय प्रमायाः करणमित्युक्तिः ॥ असाधारणधर्मो हि लक्ष
णं यथा सास्नाश्रृंगवती गौरिति सास्नावत्त्वमात्रं सरटे श्रृंगमात्रं महिष्यादावव
तिव्याप्तमिति सास्नाश्रृंगवत्त्वं विशिष्टधर्मो लक्षणं ॥ तदितरावृत्तित्वे सति सक
लतद्वृत्तित्वं असाधारणत्वं ॥ श्रृंगवत्त्वगगनकुसुमरूपादेर्गोलक्षणत्ववारणाय

॥१०॥

सत्यंतत्तद्वृत्तिसाकल्यानां यथायथं निवेशः ॥ तदिदमुक्तं लक्षणेतान्येव पदानि यात्या
णि यैः पदैरतिव्याप्त्यव्याप्त्यसंभवादयो दोषा निराक्रियंते ॥ अलक्ष्ये लक्षणगम
नमतिव्याप्तिः यथा शृंगवतीगौरिति ॥ लक्ष्यैकदेशे लक्षणस्यावर्त्तनमव्याप्तिः यथाक
पिलागौरिति ॥ लक्ष्ये क्वाप्यवर्त्तनमसंभवः ॥ यथा एकशफगौरिति ॥ इत्थं चात्र छिदि
क्रियाकरणकुठारादावतिव्याप्तिवारणाय मापदोपादानम् ॥ दोषदुष्टचक्षुरिंद्रिये भ्रमा
त्मकज्ञानकरणत्वादतिव्याप्तेः प्रपदम् ॥ प्रमाप्रमाणमित्युक्तौ चक्षुरिंद्रियेऽव्याप्तिरत
तः प्रमाकरणमिति विशिष्टमुपात्तम् ॥ ननु दोषदुष्टचक्षुरिंद्रियेणापि कदाचित्प्र
माजननात्तत्र प्रमाणव्यवहारो भवत एव ॥ न च दुष्टताद्दशायां तादृक्व्यवहारापत्ति
रिति वाच्यम् ॥ नहीदं कालघटितं लक्षणं येन तस्मिन्काले पआप्तिः स्यात् ॥ किंतु तदिं
द्रिये आपादनीयम् ॥ तत्र तु दोषशून्यताद्दशायामिष्टापत्तिरिति चेन्न ॥ यत्र घर्षणादि

न९

॥११॥

नारवं उच्चक्षुरुत्सन्नं भ्रममेवोत्पादयतन्त्राद्योपि तत्र प्रमायाऽजनके केनापि प्रमाणत्वव्यवहा
रस्यास्वीकारादिति व्याख्यापत्याप्रपदस्यावश्यकत्वात् ॥ दोषवशेनान्यदीयेदं त्वस्यैव भा
नसंभवेन सर्वांशे भ्रमस्यापि संभवात् ॥ यद्विच सर्वंशानं धर्मिण्यभ्रान्तं प्रकारे तु वि
पर्यय इति नियमात्सर्वांशेन भ्रमसंभवः ॥ तथापि तत्तदर्थमात्रायैव प्रमाणत्वव्यवहा
रात्सीतः शांख इति भ्रमजनके पीतत्वांशे प्रमाणत्ववारणाय तत्तत्प्रमात्वलाभाय
प्रपदस्यावश्यकत्वात् ॥ अनुभवस्यापि संस्कारद्वारा स्मृतिरूपज्ञानकरणत्वा
दतिव्याप्तेश्च प्रपदमिति ॥ ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात्प्रमात्व
नं विना कथं प्रमाकरणत्वज्ञानमित्यत आह ॥ प्रमा चेति ॥ यद्यपि ननु प्रमात्वं यथार्थ
ज्ञानत्वं तथा च स्मृतेरपि प्रमात्वेन तत्करणेऽनुभवे प्रपदोपादानेऽप्यतिव्याप्तितादव
स्थ्यमित्यत आह ॥ प्रमा चेति ॥ तथा चानुभवत्व घटितप्रमात्वस्य स्मृतावसत्त्वेन

॥११॥

नतत्करणेऽनुभवे तिव्याप्तिरिति भावः। अत्र चानुभवत्वस्यैव प्रमात्वरूपत्वे भ्रमे तिव्याप्तिः।
यथार्थस्यैव ×त्व× तद्रूपत्वे च स्मृतावतिव्याप्तिरित्युभयोपादानम्। ननु प्रमात्वस्यानुभ
वत्वघटितत्वे प्रमाणाभावः। न चैवं स्मृतिरूपप्रमाकरणतया अनुवस्य प्रमाणत्वापत्तिः।
इष्टत्वात्। अनुमित्युपमितिशाब्दभिन्नप्रमितिकरणत्वेन च प्रत्यक्षप्रमाणविभजनान्न
विभागव्याघातोपीत्यत आह। नह्यहुरिति। मानमितिमानमित्यादि। यथार्थानुभवो मान
मनपेक्षतयेष्यत इति यावत्। भावे त्वनुमानं मितिः प्रमितिरिति यावत्। अनपेक्षतया इ
तरप्रामाण्यानधीनप्रामाण्यकतया स्मृतेः प्रमात्वं हि अनुभवप्रामाण्याधीनमिति स्मृतेरप्र
मात्वमित्यर्थः। यद्द्वा साधारणं सहकार्यासाद्य मनो बहिर्गोचरां प्रमां जनयति तस्यैव प्रमा
णान्तरत्वमिति नियमेनानुभवसहकारेण मनसः स्मृतिरूपप्रमाजनकत्वादनुभवस्य प्र
माणान्तरत्वापत्तिः। अतः स्मृतिव्यावर्त्तमेवानुभवत्वघटितं प्रमात्वमवश्यं वाच्यम्। ए

॥१२॥

वंप्रत्यक्षं निवेश्यानुमितिमनिवेश्य प्रत्यक्षोपमितिशाब्दभिन्नप्रमितिकरणत्वेनानुभवस्या
नुमानेप्यंतर्भावापत्तिः विनिगमनाविरहादितिभावः ॥ तद्वतीति ॥ तद्विशेष्यकत्वे स
तीत्यर्थः ॥ नचैवं वन्हिगुंजापुंजयोरिमौ गुंजापुंजवन्हीति विपरीतभ्रमे वन्ह्यंशे व
न्हित्ववद्विशेष्यकत्वस्य गुंजांशे च वन्हित्वप्रकारकत्वस्य सत्वात् ॥ तत्रापि प्रमात्वा
पत्तिरितिवाच्यम् ॥ तद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वस्य विवक्षितत्वात् ॥ त
द्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमिति निष्कर्षः ॥ तथा च त
त्संबंधावच्छिन्नतद्वन्निष्ठविशेष्यतानिरूपिततत्संबंधावच्छिन्नतन्निष्ठप्रकारता
शालिज्ञानत्वं तत्संबंधावच्छिन्नतत्प्रकारकप्रमात्वमिति फलितम् ॥ तत्संबंधाव
च्छिन्नतद्वत्वनिवेशात् तेन संबंधेन तद्विरहिण्यपि कालिकादिसंबंधेन तद्वत्वस्य

॥१२॥

सत्त्वेपि न भ्रमेति व्याप्तिः एवं रजतत्वसंयोगादिसंबंधे रजतत्वप्रकारकज्ञानस्यापि प्रमात्वा
पत्तिरिति उभयत्र तत्संबंधावच्छिन्नत्वनिवेशः । लक्ष्ये लक्षणं गमयति । भवति ही ति ।
तद्वति । रजतत्ववति । तद्वगाहि रजतत्वावगाही । अलक्ष्ये लक्षणासत्त्वं प्रदर्श्य न या
जेन तद्वतीत्यस्याव्यावृत्तिमाह । शुक्त्यादिसादिना । तद्वतीति । रजतत्ववतीत्यर्थः । किंतु
रजतत्वाभाववति रजतत्वावगाहित्वात् भ्रम एवेति भावः । एतेन तदभाववति तत्प्रका
रकं ज्ञानं भ्रम इति भ्रमलक्षणं सूचितम् । ननु वृक्षः कपिसंयोगीति ज्ञानस्यापि मूलावच्छे
देन संयोगाभाववति संयोगप्रकारकत्वात् भ्रमत्वापत्तिरिति चेन्न । प्रतियोगिव्यधि
करणतदभाववत्त्वस्य विवक्षितत्वात् । वृक्षे कपिसंयोगाभावश्च न प्रतियोगिव्यधि योर
करण इति नानुपपत्तिः । न चैवं मूले वृक्षः कपिसंयोगीति ज्ञानस्य भ्रमत्वानुपपत्तिरिति

॥२३॥

शाच्यम् । तत्रावच्छेदकत्वांशे एव भ्रमत्वांगीकारात् । ननु संयोगांशेऽपीति । ननु तद्वति तत्प्रकार
कज्ञानत्वस्यैव प्रमात्वरूपत्वे संशये तिव्या[illegible]प्तिरतः निश्चयत्वघटितमेव तद्वाच्यमि
त्याशयेनेशंकते । नन्वेवमिति । एवं निश्चयत्वाघटितस्यैव प्रमात्वरूपत्वे । रजतत्वा
शइति । एकधर्मिकविरुद्धनानाकोटिकंज्ञानं संशय इति रजतत्वे संशये रजत
त्वरजतत्वाभावौ कोटी तत्रैव रजतत्वाभाववति रजतत्वाभावप्रकारकत्वाभावात् रज
तत्वाभावांशे प्रमात्वेऽपि रजतत्ववति रजतत्वावगाहित्वात्तदंशे प्रमात्वमिष्टत एवेति भा
वः । निश्चयत्वाघटितमेव प्रमात्वमिति प्राचीनसंमतिमाह । तद्वतीति । स्मृतिव्या
वर्त्तनायानुभवत्वघटितं परमंगीकुर्वतीति ननु संशयव्यावर्त्तनाय निश्चयत्वघटित
मपीति भावः । शंकते शाखेति । क्वचिन्नावित्यैव पाठः । कपिसयो[illegible]ग[illegible]रहिते दृश्येक

॥२३॥

पिसंयोगवत्त्वाभावान्नप्रमात्वसंभवदसतः कपिसंयोगवति वृक्ष इति। तत्रापि मूलावच्छेदेन क
पिसंयोगसत्वे प्रमात्वे दृष्टापत्तिरतः शाखावच्छेदेनेति सावधारणं शाखावच्छेदेनैव न तु
मूलावच्छेदेनापीत्यर्थः। कपिसंयोगीति प्रत्ययस्य प्रमात्वे अविवादान्मूल इति। मूलाव
च्छेदेनान्ततो गगनादिसंयोगस्य सत्त्वान्मूले वृक्षः संयोगीति प्रत्ययस्य प्रमात्वं सर्वसंम
तमेवेत्यतः कपिसंयोगीति। अवच्छेदकप्रत्ययस्तु कपिसंयोगावच्छेदकत्वप्रत्ययस्तु न
तथा। न प्रमा। तस्य मूलस्य तदनवच्छेदकत्वात् कपिसंयोगानवच्छेदकत्वात्। कपि
संयोगवति वृक्षे कपिसंयोगप्रकारक[illegible]त्वात् कपिसंयोगांशे प्रमात्वमेव अवच्छेदकत्व
वति अवच्छेदकत्वप्रकारकत्वाभावाच्च न तदंशे प्रमात्वमिति भावः। ननु स्मृतिः भि
न्नज्ञानत्वमनुभवत्वमिति सत्र संस्कारजन्यज्ञानत्वमेव स्मृतित्वं वाच्यं तच्च प्रत्यभिज्ञादिगन
ति प्रसक्तमननुगतं दुर्वचम्। संस्कारत्वेन तज्जन्यत्वं च स्मृतित्वस्य जातित्वमन्तरा सं

27

स्मारत्वेन जनकतायां भानाभावेनासंभवि ॥ तस्य उपाधित्वे च संस्कारजन्यत्वघटितत्वात् गुरु
तरं लक्षणं स्यात् । यदि च स्मृतित्वं जातिः तदवच्छिन्नप्रतियोगिताकभेदस्यैव च निवेशा
न्न गौरवमिति विभाव्यते तदानुभवत्वमपि जातिः तद्भिन्नत्वमेव च लक्षणमास्तां कृ
तमेतावत्कुसृष्ट्येत्याशयेनाह ॥ जातिविशेषो वेति ॥ ननु च किं मानमत आह ॥ अनुभ
वामीति ॥ अनुगतप्रतीतेरनुगतधर्मं विनाऽनुपपत्तेरनुगतधर्मोऽभ्युपेयः ॥ तस्य चो
पाधिरूपत्वे गौरवाज्जातित्वमेव न्याय्यमिति भावः ॥ अभाव इत्यनुगतप्रतीत्याभावत्वरू
पजातिसिध्यापत्तेरतो बाधकं विनेति ॥ तच्च जातिबाधकस्यैव सत्त्वान्निरासानेकसम
वेतस्यैव जातित्वादिति भावः ॥ तथाचोक्तम् ॥ व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थि
तिः ॥ रूपहानिरसंबंधो जातिबाधकसंग्रहः ॥ व्यक्तेरभेदः स्वाश्रयव्यक्तेरैक्यं ॥ यथा
आकाशत्वादि ॥ व्यक्तेस्तुल्यत्वं । अन्यूनानतिरिक्तव्यक्तिकत्वं यथा घटत्वकलशत्वा

दि॥ परस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशः संकरः। यथा भूतत्वमूर्त्त
त्वादि। अनवस्था यथा। जातित्वादि। विशेषत्वजातिस्वीकारे रूपहानिः। रूपस्य लक्षणस्य
सामान्यभिन्नत्वे सति समवेतत्वे च सति सामान्यारहितत्वरूपविशेषलक्षणस्य हानिः।
विशेषत्वरूपजातेरेवेतरव्यावर्त्तकत्वात्स्वतएव व्यावर्त्तकत्वरूपविशेषस्य रूपहानिरि
तिवार्थः। असंबंधः। असमवेतत्वम्। यथा कंबुग्रीवादिमत्वादिति। केचित्तु। स्मृतौ
व्यभिचारवारणाय विशिष्टवैशिष्ट्यावगाहि अनुभवत्वस्यैव विशेषणतावच्छेदकप्रका
रकनिर्णयजन्यतावच्छेदकत्वमुपेयम्। तथाच तज्जन्यतावच्छेदककोटिप्रविष्टत्वेनानु
भवत्वं जातिरित्याहुः। अत्र च स्वर्गाद्यनुमितिशाब्दबोधानंतरं स्वर्गादिकमनुभवामीति
प्रत्ययापत्तेः। साक्षात्काररूपमेवानुभवत्वमनुभवामीतिप्रत्यक्षविषयः। इति न तादृशा
प्रत्यक्षविषयतया प्रत्यक्षादिचतुष्टयसाधारणतत्सिद्धिः। यदपि विशेषणतावच्छेद

॥१५॥

कुतः

कप्रकारकनिर्णयजन्यतावच्छेदकतया तत्सिद्धिरिति ॥ तदपि न ॥ निस्संसारत्वेनायजन्यानुभवत्वमे
व तत्कार्यतावच्छेदकमुपगंतव्यम् ॥ तच्च जन्यत्वं ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं वा
कालिकादिसंबंधेन घटत्वादिमत्त्वं वेति निर्वक्तुमशक्यत्वात् तया जन्यप्रत्यक्षमात्रवृत्ति वैजा
त्यमेव कार्यतावच्छेदकं वाच्यम् ॥ तथा च सकलप्रत्यक्षादिजातिसाधारणानुभवत्वजा
तिसिद्धिरिति आस्तामसद्भावेन ॥ प्रमाकरणत्वघटकं करणत्वं च लक्षयति ॥ सोपार
वदिति ॥ कपालेति ॥ तत्राप्यसाधारणकारणत्वसत्त्वादिति भावः ॥ असाधारणेति ॥
असाधारणकारणत्वं च कार्यत्वानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं ॥ ई
श्वरज्ञानस्यानुपादानप्रत्यक्षविधया कार्यत्वावच्छिन्नं प्रत्येव हेतुत्वान्नातिव्याप्तिरिति
भावः ॥ ननु कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशून्यत्वं तत् ॥ तथा सति कार्यमात्रं
प्रति कालस्य हेतुत्वेन कालोपाधिविधया चक्षुरादीनामपि कार्यमात्रं प्रति हेतुतया असं

॥१५॥

गसापत्तेरिति ध्येयम्॥ ननु फलायोगव्यवच्छिन्नं कारणमेव करणम्॥ अत एव आत्मा न ज्ञा
नकरणं तस्य निसत्वेन फलायोगव्यवच्छेदाभावात् इत्यभिप्रायेणाचार्यैः कृते॥ नन्वेवमिति॥
एवम् एवंविधलक्षणकरणे व्यापारस्य सत्वादिति जन्यत्वानवच्छिन्नप्रयत्नसा
धारणकारणत्वाद्यैः सपिइत्यं॥ तज्जन्यत्वे सतीति॥ तज्जन्यत्वस्य फलेपिस
त्वात् तज्जन्यजनक इति॥ तज्जन्यजनकत्वस्येश्वरज्ञानादावपि सत्वात् तज्जन्यत्वे
सतीति॥ स्यादेवेति॥ सहकारिविरहे फलायोगव्यवच्छेदस्यासंभवितोत् सहकारि
समवधाने फलायोगव्यवच्छेदस्य चात्मन्यपि सत्वेन तत्र न ते प्यगनेरिभावः॥ नन्वे
कस्यैव कर्तृत्वकरणत्वस्वीकारे कर्त्ता करणमिति नानाविधव्यवहारोऽनुपपन्नः॥
व्यवहर्त्तृभेदस्यैव व्यवहारभेदे नियामकत्वादित्यत आह॥ उपाधीनामिति॥ त
था चोपधेयसंकरेप्युपाधेरसंकरादिति न्यायेन व्यवहर्त्तृभेदेपि व्यवहर्त्तृव्य

तावच्छेदकभेदादेव व्यवहारभेदः ॥ यथा घटरूपव्यवहर्त्तव्याभेऽपि घटत्वरूपत्वादिरूप
व्यवहर्त्तव्यतावच्छेदकभेदादेव घटोऽयमि[illegible]त्यादिव्यवहारभेदः ॥ एवं पाचक
पाठकादिव्यवहारभेदोपीति भावः ॥ अत एवेति ॥ एकस्यैव कर्तृत्वकरणत्वस्वी
कारादेवेत्यर्थः ॥ अत एव आत्मनः करणत्वस्वीकारादेवोपपत्तीयेति ॥ तृतीयायाः
करणार्थत्वादिति भावः ॥ अंगीचक्रुरस्य स्वरसोद्भावनांत ह्रीजंतु सर्वत्रैवाखं
डोपाधेरेवानुगतप्रतीतिविषयत्वे सखंडोपाधेरुच्छेद एवेति ॥ न च कर्त्रीदिया
वत्तकरणत्वनिर्वचनानुपपत्त्या अखंडोपाधिरूपत्वमेव ज्याय इति वाच्यम् ॥ न
स्यतत्साधारण्येऽप्यक्षतेः ॥ व्यवहारभेदस्य व्यवहर्त्तव्यतावच्छेदकभेदादेवान्य
थाप्युपपत्तेरिति ॥ न चैवमप्यात्मनः प्रमाणत्वापत्तिरिति चेन्न ॥ अनुभवत्वव्या
प्यजातिसंवच्छिन्नप्रमादर्शिकार्यतानिरूपितकारणताशालित्वे सति व्यापारवत्व

त्व

स्यैव प्रमाणत्वरूपत्वेनात्मनि तदसंभवादिति ॥ यत्तु तमोभिन्नचाक्षुषस्यालोकजन्यतावच्छे
दकत्वादालोकेऽतिव्याप्तेः जातिस्वावच्छिन्ने सत्तावच्छेदकतापर्याप्तिनिवेश आवश्यकः ॥
इत्थं च जन्यज्ञानत्वावच्छिन्नं प्रत्येवात्मत्वेन हेतुतया ज्ञानत्वजातेरवच्छेदककोटिप्रविष्टत्वेपि
कार्यतावच्छेदकतापर्याप्त्यधिकरणत्वाभावात्तत एव वारणेऽनुभवत्वव्याप्येति नोपादे
यमिति ॥ तन्न ॥ तथापि नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वोपगमे ज्ञानत्वावच्छि
न्नं प्रत्येवात्मत्वेन हेतुतया ज्ञानत्ववारणाय तदावश्यकत्वादिति ॥ चार्वाकमते प्रत्य
क्षस्यैव प्रमाणत्वात् ॥ भट्टानां मते चानुपलब्धेरपि प्रमाणत्वात्तन्निरासायाह ॥ चतुर्वि
धमिति ॥ तत्रेति ॥ चतुर्विधप्रमाणमध्ये इत्यर्थः ॥ तत्र प्रथमोद्दिष्टं प्रत्यक्षप्रमाणं लक्ष
यति ॥ साक्षात्काररूपेति ॥ साक्षात्कारेति ॥ अनुमानादावतिव्याप्तेर्वारणाय साक्षात्कारे
ति ॥ साक्षात्कारप्रमे सुखे साक्षात्कारस्य प्रमेति भ्रमः स्यात् साक्षात्कारिप्रमे सुखादावपि तथे

व

॥१८॥

न्याय र

ना

सतः रूपेति ॥ इयं साक्षात्करोमीति प्रतीतिः ॥ इंद्रियेति ॥ तथा च नश्च साक्षात्कारत्वरूपजा
तिसिद्धिरिति भावः ॥ ज्ञानमात्रस्येति ॥ तथा च मनोरूपेंद्रियजन्यत्वस्यानुमित्यादा
वपि सत्वेन तत्रापि साक्षात्करोमीति प्रतीतिरिति भावः ॥ ननु इंद्रियत्वावच्छिन्नजन
कतानिरूपितजन्यत्वमेव विषयः मनसस्तु मानसज्ञान एव इंद्रियत्वेन हेतुत्वं अ. नुमि
त्यादिकं प्रति तु मनस्त्वेन इत्यस्तु चेराह ॥ इंद्रियाप्रतीतावपीति ॥ इंद्रियत्वाप्रतीतावित्य
र्थः ॥ तथा चेंद्रियत्वज्ञानं विनद्घटितधर्मज्ञानाभावान्न तादृशधर्मस्य विषयत्वसं
भव इति भावः ॥ वस्तुतस्तु साक्षात्कारत्वरूपजात्यभावे इंद्रियत्वेन कार्यकारणभावा
संभवित येंद्रियत्वेनेंद्रियजन्यत्वस्य साक्षात्कारत्वरूपत्वासंभवान्नेत्थमवतारणी
यम् ॥ परं तु ननु इंद्रियनिरूपितविषयता संबंधावच्छिन्नजन्यताशालिज्ञानत्वमेवा
नुमित्यादिव्यावृत्तं तद्विषय इत्यत आह ॥ इंद्रियेति ॥ इंद्रियाज्ञानेपीत्यर्थः ॥ तथा प्रती

॥१८॥

ते: । साक्षात्करोमीति प्रतीतेरित्यर्थः । एतेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति निरस्तम् । त
दज्ञानेऽपि तत्प्रतीतेर्जायमानत्वात् इति । न च त्वयाभ्युपेय चाक्षुषत्वादिजातिरपि नास्य विष
यइत्याह । नापीति । अननुगतत्वादिति । अनुगतप्रतीतेश्चानुगतधर्मं विना अनुपपत्ते
रिति भावः । ननूपनीतभानानन्तरं साक्षात्करोमीति प्रतीतेर्लौकिकविषयतायास्तु व्यंजक
त्वेनावश्यकत्वात् लौकिकविषयताशालिज्ञानत्वमेव साक्षात्करोमीति प्रतीतिविषय । ए
वमनुगतप्रतीत्यैव जातिसिद्धौ विभुविभुरित्यनुगतप्रतीत्या विभुत्वजातिसिद्धिः स्यात्
किंतु कारणतावच्छेदकतया कार्यतावच्छेदकतया वा तत्सिद्धिः । न चात्र तत्संभवति । न चेंद्रि
यत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया तत्सिद्धिरिति वाच्यं । इंद्रियत्वस्यैकस्या
भावात् । इंद्रियनिष्ठैकत्वेषु वैजात्यं स्वीकृत्य विजातीयैकत्ववत्त्वस्य रूपस्य संभवेऽपि कार्य
मात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वेन साक्षात्कारत्वस्य नित्यवृत्तितया जन्यतावच्छेद

कत्वाभावात् ॥ जन्यत्वनिवेशेच ॥ जन्यत्वस्य ध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वादिविकल्प
ग्रासेन निर्वक्तुमशक्यतया जन्यसाक्षात्कारमात्रवृत्तिवैजात्यस्वीकृत्य तस्यैव जन्यता
त३ वच्छेदकत्वावश्यकतया कृतस्त्वकोटिप्रविष्टया साक्षात्कारत्वरूपजातिसिद्धिः ॥ एवं चा
क्षुषस्पार्शनादौ विशिष्य चक्षुरादीनां हेतुत्वावश्यकतया तादृशसामान्यकार्यकारण
भावे मानाभावाच्चेत्यत आह ॥ यद्वेत्यादि ॥ जन्यधीत्यादि ॥ जन्यायां धीस्तज्जन्यमात्रवृत्ति
र्या जातिस्तच्छून्यज्ञानत्वं साक्षात्कारत्वमित्यर्थः ॥ लक्ष्ये लक्षणं संगमयति ॥ भवति हीति ॥
अनुमितित्वादीत्यादिपदादुपमितित्वशाब्दत्वादिपरिग्रहः ॥ तत्र हि जन्यज्ञानं व्याप्तिज्ञान
अतिदेशवाक्यार्थज्ञानपदज्ञानादि तज्जन्यं अनुमित्यादि तद्वृत्त्यनुमितित्वादि तच्छून्यत्वं
साक्षात्कारत्वमित्यर्थः ॥ अत्र च ज्ञानत्वं साक्षात्कारत्वमित्युक्तौ अनुमित्यादावतिव्याप्तिरतः शू
न्यान्तं ॥ जातिशून्यज्ञानत्वं साक्षात्कारत्वमित्युक्तावसंभवः ॥ ज्ञानत्वादिजातेरेव तत्र सत्त्वा

रतो जन्यधीजन्यमात्रवृत्तीति विशेषणं। ज्ञानत्वस्य च जन्यधीजन्यभिन्ने ईश्वरसाक्षात्कारे निर्विक
ल्पके च वृत्तित्वात्तन्मात्रवृत्तित्वमिति नासंभवः। जन्यधीजन्यवृत्तीत्युक्तावपि तथा। ज्ञानत्वा
देर्जन्यधीजन्यसविकल्पकवृत्तित्वादतो मात्रेति। जन्यधीजन्यभिन्नावृत्तित्वे सति जन्यधीज
न्यवृत्तित्वं च तन्मात्रवृत्तित्वं। चाक्षुषत्वादिजातेरपि धीजन्यमात्रवृत्तित्वादव्याप्तिरतः प्रथम
जन्यपदोपादानं। तस्य च जन्यज्ञानाजन्यनिर्विकल्पकवृत्तित्वात्तन्मात्रवृत्तित्वं। जन्यजन्य
मात्रवृत्तीत्युक्तावपि निर्विकल्पकस्य जन्यशरीरजन्यत्वेन चाक्षुषत्वादे। जन्यमात्रवृत्ति
त्वादव्याप्तिरतो धीपदोपादानं। जन्यधीमात्रवृत्तीत्युक्तावपि चाक्षुषत्वस्य जन्यज्ञानान्यमा न
न्य३ त्रवृत्तित्वादतो द्वितीयजन्यपदोपादानं। जन्यमात्रवृत्तीत्युक्तावपि न तथेत्यतो जन्यधीति। धी
मात्रवृत्तीत्युक्तौ ज्ञानत्वादिकमादायासंभव इति समुदितमुपात्तम्। जन्यधीजन्यमात्र
वृत्तिभिन्न-धर्म-त्वमित्युक्तौ सविकल्पकत्वस्य तन्मात्रवृत्तित्वेनाव्याप्तेरतो जातिपदं। स

॥१९॥

विकल्पकत्वं तु न जातिः । चाक्षुषत्वादिना संकरात् । समवायसंबंधावच्छिन्नजातिभिन्नत्वं चात्र
बोध्यं । अन्यथा कालिकादिसंबंधेन नानुमितित्वादेः प्रत्यक्षापि(?) दोषसत्वेनासंभवापत्तेः ।
एतदर्थमेव च जातिपदं । घटाद्यावृत्तिव्याप्तिवारणाय ज्ञानत्वमिति । ननु उपादानप्रत्यक्ष
रूपजन्यज्ञानजन्यमात्रवृत्ति
स्य कार्यमात्रं प्रति हेतुतया कपाकैलविषयकोपादानप्रत्यक्षरूपजन्यज्ञानजन्यमात्रवृत्ति
घटत्वादिजातिसत्वात्तत्र नातिव्याप्तिरिति चेन्न । सर्गाद्यकुलालीभूयईश्वरेणैव घटो
त्पादनादीश्वरकपालप्रत्यक्षस्य चाजन्यतया घटत्वादेर्जन्यधीजन्यमात्रवृत्तित्वाभावात्
घटाद्यावृत्तिव्याप्तिसंभवात् । सामान्याद्यावृत्तिव्याप्तिसंभवाच्चेति दिक् । निदिध्यासनेषु पले
क्षणं । काशीमरणस्थले तारकोपदेशाजन्यज्ञानेस(?) पिद्रष्टव्यं । निदिध्यासने साक्षादिनोजन्य
धीजन्यमात्रवृत्तित्वं सूचितं । ननु तत्त्वसाक्षात्कारत्वं श्रवणादिप्रयोज्यात्मविशेष्यकत्वरी
रादिभिन्नत्वप्रकारकसाक्षात्कारत्वं तच्च विशिष्टस्यानतिरेकात् साक्षात्कारत्वमेव तच्च

॥१९॥

नजन्यधीजन्यमात्रवृत्तीति कुतो व्याप्तिरित्यत आह ॥ मोक्षेति ॥ तथा च मुक्तित्वावच्छिन्नकार्यता
निरूपितकारणतावच्छेदकतया सिद्धस्य न तत्त्वज्ञानवृत्तिवैजात्यस्य निदिध्यासनादिज
न्यमात्रवृत्तित्वात्तच्छून्यत्वाभावेनाव्याप्तिरिति भावः ॥ मानसेति ॥ तथा च मानसावृत्तिज
नुमितित्वादिकमेव तच्छून्यत्वस्य सत्त्वान्नाव्याप्तिरिति भावः ॥ इदमुपलक्षणं ॥ आराध्य
त्वप्रकारकज्ञानरूपभक्तिवृत्तिभक्तित्वफलावश्यंभावनिश्चयत्वरूपश्रद्धानिष्ठश्रद्धा
त्वरूपजात्याऽजन्यधीजन्यमात्रवृत्तित्वान्मानसावृत्तीति जातिविशेषणमावश्यकमेवेति
ध्येयम् ॥ ननु मानसत्वं मनोजन्यत्वं तथा चानुमितित्वादेरपि मानसावृत्तित्वाभावादनुमि
त्यादावतिव्याप्तिः ॥ न च तादृशजात्यप्रसिद्धिः ॥ इदं वृत्तप्रभवतावच्छेदकतया इदं वृत्तिजाते
रेतादृशत्वादित्यत आह ॥ मानसत्वं चेति ॥ ननु मानसत्वस्य जातित्वे प्रमाणाभावादित्यत आ
ह ॥ इत्यास्तां विस्तर इति ॥ आत्ममानसत्वावच्छिन्नं प्रति विजातीयक्षिमनःसंयोगत्वेन कार

धा २

॥२०॥

लाद्धेतुत्वज्ञन्यतावच्छेदकतया मानसत्वजातिसिद्धिरिति भावः। वैशिष्ट्यानवगाहिज्ञानं निर्विकल्प
कं तदेव साक्षात्कारः। अयं घट इति वैशिष्ट्यविषयके इति शेषः। घटत्वाघलीकेति। तन्मते
अनुगतधर्मो घटत्वादिरतद्व्यावृत्तिरूप एव व्यावृत्तिरन्योन्याभावः। अभावश्च तन्मते तुच्छः।
अलीक इति यावत्। तथा चाभावरूपघटत्वस्यालीकस्य विशिष्टज्ञाने भानात् सदसतोश्च सं
बंधाभावात् विशिष्टोपलीक एव। असद्विषयकं च ज्ञानं भ्रम इति। सविकल्पकज्ञानं भ्रमः।
निर्विकल्पके च घटत्वादेरभानात्। पारमार्थिकविषयकत्वेन तत्रैव साक्षात्कारे प्रमाअ त्वं
स्त० र्थं तस्यैव प्रत्यक्षत्वादिति भावः। बाधकं विनेति। विषयविसंवाद एवाप्रमात्वे बाधकः।
यथा शुक्तौ रजतत्वस्य। प्रकृते च घटत्वस्याविसंवाद एवेति भावः। ननु विषयविसंवाद
स्य बाधकत्वं न ब्रूमः। अपि त्वलीकविषयत्वस्येत्यभिप्रेत्याह। न चेति। अलीकत्वासिद्धेरि
ति। अभावस्यापि घटादिपदार्थवदनुभूयमानतयालीकत्वमसिद्धमिति कुतो त

॥२०॥

व्यावृत्तिरूपघटत्वस्यालीकत्वं ॥ एवं अघटव्यावृत्तिरिसत्र घटभिन्नयत्किंचित्प्रतियोगिक
भेदस्यापदेपिसत्वात् घटभिन्नयावत्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटए
व घटत्वं वाच्यं ॥ तथा च यावत् प्रतियोगिज्ञानाभावात् घटत्वबुद्धेरुच्छेद एव स्यात् ॥ य
द्विचाभावत्वेनाभावज्ञाने एव प्रतियोगिज्ञानापेक्षा ॥ अत्र च स्वरूपत एव घटत्वस्य
भानान्नानुपपत्तिरिति विभाव्यते ॥ तथापि घटत्ववानिति बुद्धेरुच्छेदापत्तिः ॥ तत्र घट
त्वत्वेन घटत्वस्याभानात् ॥ तस्य च भवन्मते यावत्प्रतियोगिज्ञानं विनासंभवादिति ॥ किं
चात व्यावृत्तिभिन्नस्यैव घटत्वादेरुपलंभान्नाभावरूपत्वमिति कुतः अलीकत्वसंभा
वनेति भावः ॥ भट्टादिभिरीश्वरानंगीकारेण तज्ज्ञानस्य सुतरामसंभवित्वेन साक्षा
त्कारस्यैकविधत्वमेवांगीक्रियत इत्यसतस्तन्मतं निराकर्तुमाह ॥ सच्चेति ॥ कार्यमात्रं
प्रत्युपादानप्रत्यक्षस्य हेतुतया परमाण्वादिरूपोपादानप्रत्यक्षं विना द्व्यणुकादिरूपकार्य

ग

अवच्छ्यं

॥२१॥

ग

स्यानुसस्याईश्वरोऽंगीकार्यः॥ तथा च तज्ज्ञानसत्वेन तस्य द्वैविध्यमेवोचितमिति भावः॥ द्वैवि
ध्यमेव विवृणोति॥ नित्येत्यादिना॥ नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियो
गित्वं॥ ससंत निवेशात् ध्वंसे अतिव्याप्तिः॥ प्रागभावे अतिव्याप्तिवारणाय च विशेष्यदल
निवेशः॥ अनित्यत्वं च प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वं वा॥ अन्यदिति॥ भगवत्सं
बंध्यन्यदित्यर्थः॥ अस्मदादिसाक्षात्कार इति यावत्॥ तत्रापि निर्विकल्पकसविकल्पकयो
र्मध्ये॥ वैशिष्ट्यानवगाहीति॥ वैशिष्ट्यविषयताशून्यज्ञानत्वमित्यर्थः॥ निर्विकल्पके वि
शेषणज्ञानसंपत्त्यर्थं घटत्वविषयकत्वमावश्यकं॥ व्यक्तिभानमंतरा च जातिभानासं
भवात् घटविषयकत्वमपि तस्यांगीक्रियते॥ वैशिष्ट्यविषयकत्वे तु न किंचित्साधक
मिति वैशिष्ट्यानवगाहित्वमक्षतं॥ सविकल्पके च वैशिष्ट्यस्यापि विषयत्वान्न तत्रातिव्या
प्तिरिति भावः॥ नहिं सिंहाकारज्ञानस्वीकारे तु तन्निरूपितवैशिष्ट्यविषयताशून्यज्ञा

ग

॥२१॥

नत्वं तन्निर्विकल्पकमिति ध्येयम्॥ ननु चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपकारणबलात्
घटघटत्वयोर्भानवच्चक्षुःसंबद्धविशेषणतारूपकारणबलात्तत्संबंधस्यापि भाने बाध
काभावः॥ प्रतिबध्यप्रतिबंधकभावकल्पने च गौरवात् तथा चेदं लक्षणं असंभवग्रस्त
मित्यत आह॥ निराकारं चेति॥ निष्प्रकारकं चेत्यर्थः॥ क्वचित्तथैव पाठः॥ वस्तुतस्तु वै
शिष्ट्यानवगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्यानवगाहीत्यर्थः॥ वैशिष्ट्यनिष्ठसांस
र्गिकविषयताशून्यत्वं तत्त्वमिति निष्कर्षः॥ ननु प्रकारतासामान्यशून्यत्वं विशेष्यतासामा
न्यताशून्यत्वमपि लक्षणं कर्तुं शक्यत एवेति तत्कथं नोक्तमित्यत इष्टापत्त्या तथैवा
ह॥ निराकारं चेति॥ निष्प्रकारकं निर्विशेष्यकं चेत्यर्थः॥ आकारश्चात्राप्यवस्थित
विकल्पे इष्यत इति पुनर्निर्विर्व्यलीकः पंथाः॥ ननु अयं घट इति ज्ञानोत्तरं घटत्वेन मं जाना
मीत्यनुव्यवसायः॥ तत्र वैशिष्ट्यस्य तृतीयार्थत्वे घटत्वविशिष्टविषयकं ज्ञानं वा नितिः॥

प्रकारकत्वस्य तृतीयार्थत्वे घटत्वप्रकारकज्ञानवानितितदाकारः ॥ तथाच तादृशानुव्यवसाय
बलात् सविकल्पकस्य प्रत्यक्षसिद्धत्वे निर्विकल्पकस्य अनुव्यवसायगम्यत्वाभावात् नत
त्र प्रत्यक्षं प्रमाणं ॥ नाप्यनुमानम् अप्रयोजकत्वादिति मीमांसकमतं हृदिस्थीकृत्य सशं
कते ॥ तत्रेति ॥ निर्विकल्पकं चेत्यर्थः ॥ प्रत्यक्षसिद्धमनुव्यवसायात्मकप्रत्यक्षे प्रमि
तिगम्यं ॥ अभ्युपगमादिति ॥ नैयायिकैरिति शेषः ॥ अनुमेयं ॥ अनुमानगम्यं ॥
तच्चायं घटइत्साकारकं जन्यघटत्वविशिष्टसाक्षात्कारः ॥ जन्यघटत्वज्ञानपूर्वकः ॥
जन्यघटत्वविशिष्टज्ञानत्वात् ॥ यद्यद्विशिष्टज्ञानं भवति तत्तज्ज्ञानपूर्वकं भवतीति
सामान्यमुखव्याप्तौ दंडीपुरुष इति प्रत्यक्षं दृष्टान्तः ॥ न च अत्र कार्यकारणभावादिरूपानु
कूलतर्काभावादप्रयोजकत्वमित्यत आह ॥ तथाहीत्यादि ॥ जन्यतद्विशिष्टज्ञानत्वाव

छिन्नं प्रतिजन्यतद्विशेषणज्ञानत्वेन हेतुत्वमिति कार्यकारणभावादिरूपानुकूलतर्क इति भा
वः॥ घटत्वज्ञानादेर्विशिष्टज्ञानवारणाय तत्तदन्तर्भावि॥ निरूप्यावच्छेदनाय च कार्य
तावच्छेदके जन्यत्वप्रवेशः॥ निसस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमात्कारण
तावच्छेदकेपि जन्यत्वप्रवेशः॥ वस्तुतस्तु॥ सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वबोध
नाय कारणतावच्छेदके जन्यत्वनिवेशनमिति बोध्यम्॥ निर्विवादमिति॥ यथा च नु
विंशादस्तथोपरिष्टाद्दृश्यते॥ तथा च कार्यकारणभावे रूपानुकूलतर्कसत्त्वात्प्रयो
जकत्वमनुमानस्येति भावः॥ पक्षहेतुसंगमयति॥ भवति चेति॥ धारावाहिकस्थले
द्वितीयविशिष्टज्ञानस्य पूर्वपूर्वविशिष्टज्ञानजन्यत्वसंभवान्न निर्विकल्पकसिद्धि
रित्यतः प्राथमिकमिति॥ तत्रापि [illegible] घटत्वविशिष्टज्ञानेस्यापि॥ ननु घटत्वप्रका
रकज्ञानमेवांगीक्रियतामित्याशंक्य निराचष्टे॥ न चेति॥ तदानीं प्राथमिकघटत्वविशिष्टज्ञा

न्य ४

॥तर्कप्र०॥

॥२३॥

नास्तूर्व॥अज्ञानादिति॥तथा च विशेषणज्ञानं विना तस्य न विशिष्टज्ञानत्वमिति भावः॥ तत इति॥
विशेषणज्ञानाभावेन तस्य विशिष्टज्ञानत्वाभावादित्यर्थः॥ नदिति॥ घटत्वविषयकं ज्ञान
मित्यर्थः॥ ननु वैशिष्ट्यानवगाहि घटत्वविषयकज्ञानसिद्धावपि न निर्विकल्पकसिद्धि
रित्यत आह॥ तदेव चेति॥ अनन्यथासिद्धपूर्ववर्त्तिन एव कारणत्वाज्ज्ञानान्तरीयघट
त्वविशिष्टज्ञानस्य पूर्ववर्त्तित्वादेव कारणत्वमस्त्विति साशंकते॥ न चेति॥ अव्यवहितेति॥
न हि पूर्ववर्त्तित्वमात्रं कारणत्वं घटकं अपि त्वव्यवहितपूर्ववर्त्तित्वं च न तत्रेति भावः॥ का
र्यमात्रं प्रति ज्ञानत्वेन हेतुत्वादीश्वरीयज्ञानस्यैव हेतुत्वमस्त्विति साशंकते॥ न चेति॥ जन
कं घटत्वविशिष्टज्ञानजनकं॥ सामानाधिकरण्येति॥ एकस्य दंडज्ञाने पुरुषान्तरस्य द
ण्डविशिष्टज्ञानवारणाय समवायसंबंधेन तद्विशिष्टबुद्धिं प्रति समवायसंबंधेन तद्विशे
षणज्ञानस्य हेतुत्वमिति सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वेन भगवज्ज्ञानस्य न हेतुत्व

स

ते

॥राम॥

॥२३॥

मितिभावः। अधिकरणत्वात्। अस्मदीयघटत्वविशिष्टज्ञानमधिकरणत्वात्। तत्र कारणमि
ति। घटत्वविशिष्टानुभवे कारणमित्यर्थः। न देवस्मरणात्मकज्ञानमेवापूर्वानुभवस्य स
मवायसंबंधेन स्मरणपूर्वमसत्वात् विशिष्टज्ञानत्वस्य विशेषणज्ञानकार्यतानवच्छेदकत्वे
न विशिष्टानुभवत्वमेव कार्यतावच्छेदकं वाच्यमित्याह। विशिष्टानुभवे हीत्यादिना॥ ननु
स्मरणेपीति। ननु विशिष्टस्मरणेपि। तेन विना। विशेषणज्ञानेन विना। तदुपपत्तेरि
ति। विशिष्टस्मरणोपपत्तेरित्यर्थः। कदाचिद्दंडज्ञानासत्वे संस्काराभावेनैव दंडविशि
ष्टस्मरणाभावात्तत्र विशेषणज्ञानहेतुत्वस्य निरर्थकत्वात् पूर्वानुभवस्य विनष्टत्वात् विशे
षणज्ञानस्य स्मरणजनकत्वासंभवाच्चेति भावः। ननु पूर्वानुभवस्य नष्टत्वात् स्मरण
जनकत्वासंभवेपि विशिष्टस्मरणमेव स्मरणपूर्वकत्वं नीयमित्यत आह। अन्यथेति
अन्यथा विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानस्य हेतुत्वे पूर्वमनुभवस्यासत्वात् तज्जन
कमपि स्मरणोत्तरमित्यनवस्थेत्यर्थः। न च अनुभवत्वजातेर्मानाभावेन स्मृत्यन्यज्ञानत्वरूपस्य

॥२४॥

तस्य निवेशे गौरवाद्विशिष्टज्ञानमात्रे विशेषणज्ञानस्य हेतुत्वे न विशिष्टस्मरणस्यापि विशेषण
ज्ञानं हेतुः। न चानवस्था। तत्पूर्वं निर्विकल्पात्मकस्मृतेरेवोपगमात्। तेन च ममापि घटत्व
विशिष्टानुभवपूर्वं घटत्वविशिष्टस्मरणस्य तत्पूर्वं च घटत्वनिर्विकल्पकस्मरणस्य कल्प
नेन न दोष इति वाच्यं। तत्पूर्वं ज्ञानद्वयकल्पने गौरवांतदपेक्ष्य घटत्वनिर्विकल्पकानुभव
स्यैव स्वीकर्तुमुचितत्वादित्यत आह। अस्तु वेति। तथा सति ममापि घटत्वविशिष्टानुभव
पूर्वं घटत्वनिर्विकल्पकस्मरणमेव कल्प्यत इति न ज्ञानद्वयकल्पने गौरवमिति भावः। न
चैनिर्विकल्पकात्मकस्मृतिस्वीकारान्निर्विकल्पकं ज्ञानं सिद्धमेवेति किं विवाद इति वाच्यं।
तथापि निर्विकल्पकानुभवस्यासिद्धत्वादिति। ननु च निर्विकल्पकात्मकस्मरणमेवानुप
पन्नं। तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन हेतुत्वा
त्। जायमानं सप्रकारकमेव स्याद्। ननु निष्प्रकारकमिति चेत्सा तद्विषयकस्मृतिं प्रति तद्वि

॥२४॥

षयकसंस्कारत्वेनापिसामान्यकार्यकारणभावकल्पनाद्विशेषणज्ञानेविनाजायमानंनिर्विक
ल्पकमेवजायतइतिदिक्॥ ननुसर्वत्रविशिष्टानुभवपूर्वंविशिष्टस्मरणस्यनिर्विकल्पका
लकस्मरणस्यवाहेतुत्वकल्पनेनस्मरणेप्यनुभवःकारणंतदनुभवेचस्मरणान्तर
मित्यनवस्था। किंचपूर्वाननुभूतपदार्थस्यआद्यानुभवेस्मरणमेवकारणंवाच्यं॥ तच्च
नसंभवति॥ तज्जनकानुभवाभावात्॥ जन्मान्तरीयानुभवादेवतत्स्मरणोपगमेजन्मा
न्तरानुभूतानांघटादिपदार्थानामपिस्मृतिप्रसंगादितिचेन्न॥ आद्यानुभवजनकस्मर
णस्यजन्मान्तरीयानुभवादेवानापत्त्याऽदृष्टविशेषोद्बोधकसहकृतादुपपत्तेः॥ नचघटा
दिस्मृतिप्रसंगः॥ तत्रफलोसत्त्वेरभावेनादृष्टस्योद्बोधकत्वाकल्पनात्॥ अनवस्थाप्य
प्रामाणिकत्वेनादुष्टत्वादिति॥ नकिंचिदेतत्॥ तदसंभवात्॥ स्मरणासंभवात्॥ ननुअदृ
ष्टविशेषरूपोद्बोधकवशाज्जन्मान्तरीयानुभूतंचेत्तत्तदपिस्मर्यतामित्यतआह॥ नहि

या

ति॥ पूर्वमिति॥ जन्मांतरेइत्यर्थः॥ अनुभूतमिति॥ चैत्रत्वादिजातेस्तच्छरीरवृत्तित्वेन चैत्रशरी
रस्य जन्मांतरेऽभावेन तद्वृत्तिचैत्रत्वोद्ग्राहकाभावादनुभवासंभवेन न स्मृतिसंभवः॥
तत्स्मरणस्य तदनुभवपूर्वकत्वनियमादितिभावः॥ ननु प्रयोजकोयं नियमो नादरणी
य इत्यत आह॥ न चेति॥ तस्य अनुभवस्य तद्धेतुत्वात्॥ स्मरणहेतुत्वात् तथा च स्मृति
त्वावच्छिन्नं प्रत्यनुभवस्य हेतुतयानतादृशनियमोऽप्रयोजकत्वमितिभावः॥ न च ईदृश
कार्यकारणभावे मानाभाव इति वाच्यम्॥ तथा सति कदाचिदप्यननुभूतस्य अनुभू
तस्य वा तदंशेउपेक्षात्मकज्ञानविषयस्य स्मरणापत्तेरुपेक्षान्यज्ञानत्वेन तद्धेतुताया
आवश्यकत्वात्॥ न च संस्काराभावान्नेयमापत्तिरिति वाच्यं॥ संस्काररूपव्यापारद्वा
रा तस्यापि हेतुत्वात्॥ व्यापारेण च व्यापारिणोन्यथासिद्ध्यभावेन संस्कारेणानुभवान्य
थासिद्धेरसंभवात्॥ उपजीव्यविरोधाच्च॥ तथाहि॥ आशुविनाशिनः कालांतरभावि

फलं प्रतिकारणत्वं व्यापारं विनानुपपन्नमिति अनुपपत्तिज्ञानाच्चिरध्वस्तानुभवस्यका
लांतरीयस्मृतिहेतुत्वोपप सर्थं व्यापारे कल्पनीये संस्कार एव व्यापारः कल्प्यत इत्य
नुभवस्यकारणत्वमुपजीव्यैव संस्कारसिद्धिरिति ॥ ननु तर्हि कूप्तत्वादनुभवध्वंसे
स्यव्यापारत्वमास्तां कृतमकूप्तसंस्कारकल्पनेन ॥ न च कार णीभूताभावप्रतियो
गित्वस्यैव प्रतिबंधकत्वपदार्थत्वात्स्मृतिकारणीभूतानुभवध्वंसप्रतियोगित्वस्यानुभ
वेपि सत्वात्तत्प्रतिबंधकत्वापत्त्या न तस्य तद्धेतुत्वमिति वाच्यं ॥ प्रतिबंधकसंसर्गाभा
वत्वेनैव कार्यमात्रे हेतुतया संसर्गाभावत्वावच्छिन्नकारणताया एव प्रतिबंधकत्वशा
रीरघटकत्वात्त्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन संसर्गाभावत्वावच्छिन्नकारणता
यां अवच्छेदको यो धर्मः तद्वत्त्वस्यैव प्रतिबंधकपदार्थत्वात् ॥ तद्धर्मावच्छिन्नकार्यतानिरूपि
तसंसर्गाभावत्वावच्छिन्नकारणतानिरूपितत्वावच्छिन्नप्रतियोगिताकत्वसंबंधाव

छिन्नावच्छेदकताश्रयधर्मवत्वस्य तद्धर्मावच्छिन्नप्रतिबंधकत्वपदार्थत्वादिति निष्कर्षः ॥ तथा
चानुभवध्वंसस्य ध्वंसत्वेन कारणतया संसर्गाभाववत्वेनाकारणत्वान्न प्रतिबंधक
त्वापत्तिरिति चेन्न नहि सर्वांशोपेक्षात्मकज्ञानादपि स्मरणापत्तेः ॥ अस्मन्मते चो
पेक्षान्यज्ञानत्वेन संस्कारहेतुतया तदभावादेवास्मरणात् ॥ न च स्मरणं प्रत्येव
तेन रूपेण हेतुत्वमस्तु कृतमंतर्गडुना संस्कारेणेति वाच्यं ॥ उपेक्षात्वस्यैकस्याभावेन
नत्वद्धेत्कित्वावच्छिन्नप्रतियोगिताकभेदकूटस्यैव निवेशनीयतया स्मृतिजनकतायां स
र्वांशोपेक्षाभेदआंशिकोपेक्षाभेदानामेकत्रैव निवेशप्रसंगेन तेषां मिथो विशेषणविशेष
भावे विनिगमनाविरहेण कार्यकारणभावानंत्यप्रसंगात् ॥ मन्मते च संस्कारजनकता
वच्छेदककोटौ सर्वांशोपेक्षाभेदानामांशिकोपेक्षाभेदानां च स्मृतिजनकतावच्छेदककोटौ
निवेशेन एकत्र तेषामनिवेशात् लाघवम् खंडितमेवेति संस्कारसिद्धेरावश्यकत्वा

॥२६॥

ह

इति स्फुटं पल्लवितेन ॥ ननु प्रमेयत्वानि सत्यनुभवे प्रमेयत्वेन चैत्रत्वविशिष्टस्यापि पूर्वमनुभूत
त्वात् अदृष्टविशेषस्य च प्रमेयत्वांशे उद्बोधकत्वाकल्पनेन न केवलं चैत्रत्वविशिष्टस्य स्मरणो
पपत्तिः ॥ तदंशेऽन्या प्रकारकस्मृतिं प्रति तदंशेऽन्याप्रकारकत्वेन तु नानुभवस्य हेतुत्वं
जातिमानित्यनुभवोत्तरं स घट इति स्मरणापत्तेश्च ॥ जातित्वांशे उद्बोधका लाभस्याक
ल्पनेनैव वारणात् ॥ उद्बोधकलाभालाभयोः फलोन्नेयत्वादिति ॥ अनयैव च रीत्या अ
हं द्रष्टा रथादिमनःपदस्थानि ग्रहोपीसत आह ॥ किं चेति ॥ तस्य तन्मितिः उद्बोधकविर
हादिति विशेषणाविशिष्टज्ञानसामग्र्यभावात् ॥ घटत्वज्ञानरूपघटत्वप्रकारकज्ञानसा
मग्र्यभावात् ॥ साक्षात्कारसामग्रीतः चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपचाक्षु
षप्रत्यक्षसामग्रीतः साक्षात्कारो सत्तो चाक्षुषप्रत्यक्षो सत्तो न त्वेतावता साक्षात्कारोत्प

दि

तावपि न निर्विकल्पकसिद्धिरित्यत आह ॥ तदेव चेति ॥ घटत्वज्ञानशून्यकाले जायमानं प्रत्यक्ष
मेवेत्यर्थः ॥ अस्माकं निर्विकल्पकमिति नैयायिकानामिति ॥ तथा चात्र घटत्वज्ञानाभा
वात् जायमानं घटत्वज्ञानं निष्प्रकारकमेव भविष्यतीति सिद्धं निर्विकल्पकात्मकज्ञा
नमिति भावः ॥ ननु रक्तो दण्डो न वेति संशये रक्तत्वविशिष्टवैशिष्ट्यावगाहिज्ञाना
नुदयाद्विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन
हेतुताया आवश्यकत्वात्तत एव दण्डज्ञानशून्य कालेदण्डविशिष्टपुरुषज्ञानानुत्पत्ति
निर्वाहे अलं विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया । न च विशिष्टस्य वैशिष्ट्यमिति
न्यायेन विषयताशालिबुद्धिं प्रत्येव विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वेन दण्डज्ञा
नशून्यकाले विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमिति न्यायेन दण्डविषयज्ञानापत्तिरि

राम॥

रणायत्तं हेतुत्वमावश्यकमिति वाच्यं तथापि तद्धेतोरेवेति न्यायेन विशेषणविशेष्येंद्रियसंनि
कर्षादेव विशिष्टप्रत्यक्षोत्पत्तेः ॥ अनुमित्साहेतु परामर्शादिरेव नियामक इत्याशयेन मीमां
सकः शंकते ॥ नन्विति ॥ हेतुतासिद्धौ विशिष्टज्ञानं प्रति हेतुतासिद्धौ ॥ सर्वमेवैतत् नि
र्विकल्पकादिसाधनं ॥ एवं स्यात् पूर्वोक्तन्यायेन सयुक्तिकं स्यात् ॥ तच्चैव चेति ॥ विशे
षणज्ञानस्य विशिष्टज्ञानहेतुत्व एव चेत्यर्थः ॥ मानमिति ॥ विशेषणविशेष्येंद्रियसं
न्निकर्षादेव तदुपपत्तेस्तत्र प्रमाणाभाव इत्यर्थः ॥ प्रमाणाभावस्य च प्रमेयाभावव्या
प्यत्वादिति भावः ॥ अन्वयव्यतिरेकाभ्यामिति ॥ विशेषणज्ञानसत्त्वे विशिष्टज्ञानं वि
शेषणज्ञानाभावे विशिष्टज्ञानाभाव इत्येवंरूपान्वयव्यतिरेकाभ्यामित्यर्थः ॥ तदवधा
रणात् विशेषणज्ञानस्य विशिष्टबुद्धिहेतुत्वावधारणात् ॥ यथा अन्वयव्यतिरेकाभ्यां

दंडेकारणत्वग्रहस्तथाप्रकृतेपीतिभावः॥ ननु केवलमन्वयव्यतिरेकावेव न कारणताग्रा
हकौ अतिप्रसंगात् अपि त्वनन्यथासिद्धान्वयव्यतिरेकावेव प्रकृते च विशेषणविशे
ष्येंद्रियसन्निकर्षेण विशेषणज्ञानस्यान्यथासिद्धत्वात् न तथाविधयोः संभव इत्यस्य
तआह॥ विस्तरस्त्विति॥ अनुसंधेय इति॥ कदाचित्घट इति स्वरूपतो घटत्व
प्रकारकज्ञानस्य कदाचिच्च जातिमानिति जातित्वरूपेण घटत्वप्रकारकज्ञानस्यापि सत्त्वि
रिति नियमनिर्वाहाय स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो घटत्वज्ञानत्वेन जाति
त्वेन घटत्वविशिष्टबुद्धिं प्रति च जातित्वेन घटत्वज्ञानस्य हेतुतायाः आवश्यकत्वे त
या विशेषणज्ञानस्य हेतुतासिद्धिः॥ अथ घटत्वज्ञानसत्त्वेपि कदाचिदयं घट इत्याका
रक घटत्वप्रकारकज्ञानस्य कदाचिच्च अत्र घटत्वमित्याकारक घटत्वविशेष्यकज्ञान

स्योत्पत्त्या तन्निर्वाहाया नापत्त्या तत्तज्ज्ञाने अदृष्टविशेषस्यैव नियामकत्वमावश्यकं । तथा च प्र
कृतेऽपि अदृष्टविशेषेणैव तथाविधकादाचित्कज्ञानद्वयोपपत्तेरलं विशेषणज्ञानहे
तुतयेति चेन्मैवं । तत्र गत्यंतराभावेनादृष्टस्य नियामकत्वकल्पनेपि प्रकृते दर्शितरी
त्यागतिसंभवे दृष्टविशेषस्य नियामकत्वकल्पनाया अन्याय्यत्वात् । एकत्र अदृष्टस्य नि
यामकत्वकल्पनादन्यत्रापि तस्यैव नियामकत्वकल्पने कार्यकारणभावमात्रोच्छेदापत्ते
रिति । ननु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वं नाम घटत्वांशे अन्याप्रकारकघटत्व
प्रकारकबुद्धित्वं । तत्र जातित्वादिभासकसामग्रीसत्त्वे जायमानं ज्ञानं घटत्वांशे अन्यप्रका
रकमेवोत्पद्यते । तदृशो जातित्वादिभासकसा[मग्र्य]सत्त्वे च घटत्वांशेऽन्यप्रकारक
मेवजायते इति तादृशधर्मस्य नीरलेतरघटत्ववदर्थसमाजग्रस्तत्वेन जन्यतानवच्छेद

57

कत्वात्कथं तादृशज्ञानं प्रति स्वरूपतो घटत्वज्ञानस्य हेतुत्वं कल्पयित्वा विशेषणज्ञानस्य हेतुत्वसि
द्धिरिति चेन्न ॥ जातित्वभासकसामग्रीसत्त्वेपि जातिमान् घट इति स्वरूपतो घटत्वविशि
ष्टबुध्युदयात् घटत्वांशे निरवछिन्नप्रकारताशालिज्ञानत्वमेव स्वरूपतो घटत्वविशिष्ट
बुद्धित्वं तदवछिन्नं प्रति च स्वरूपतो घटत्वज्ञानस्य हेतुत्वकल्पनं विना आपत्तिवारणाऽ
संभवादिति ॥ ननु नित्यस्यावर्त्तनाय जन्यविशिष्टज्ञानत्वमेव विशेषणज्ञानकार्यतावछे
दकं वाच्यं ॥ तत्र जन्यत्वं ध्वंसप्रतियोगित्वं वा प्रागभावप्रतियोगित्वं वा कालिकसंबंधेन घ
टत्वादिमत्वं वेसत्र विनिगमनाविरह इति चेन्न ॥ नित्यवृत्तिधर्मस्यापि कार्यतावछेदकत्वे
क्षतिविरहात् ॥ अथैवं कारणतानुपपत्तिः ॥ कारणत्वं हि कार्याव्यवहितपूर्वक्षणाव
छेदेन कार्याधिकरणदेशनिष्ठाभावप्रतियोगितानवछेदकधर्मवत्वं ॥ तच्च घटाधिकर

च

वे

णकपालेयत्किंचिद्दण्डाव्यवहितपूर्वक्षणावच्छेदेन दण्डाभावसत्वात्कारणत्वानुपपत्तिरिति तत्का
र्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मव
त्वं वाच्यं ॥ तथा सति घटत्वावच्छिन्नप्रतिरासभस्यान्यथासिद्धस्याकारणत्वप्रसंगः ॥ यत्किंचिद्घटाव्य
वहितपूर्वक्षणावच्छेदेन कपाले तस्यसत्वात् ॥ तथा च कार्यतावच्छेदकावच्छिन्नयावद्व्यक्ती
स्तत्तद्व्यक्तित्वेन धृत्वा तत्तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणवृत्त्यभा
वेऽसे ववाच्यं ॥ एवं च निखिलवृत्तिधर्मस्य कार्यतावच्छेदकत्वे कार्यतावच्छेदकावच्छिन्नयाव
न्मध्ये निखिलव्यक्तेरपि प्रविष्टतया तद्व्यवहितपूर्वक्षणाप्रसिद्धिरिति चेन्न ॥ कार्यकारण
भेदेन कारणताया भिन्नतया प्रकृते निखिलव्यक्त्यतिरिक्तव्यक्तीनामेव तत्तद्व्यक्तित्वेनोपा

59

दानात्तत्साधारणरूपेण कार्यत्वेपिकारणत्वेबाधकाभावात्। एवं समवायकालिकविशेष
णतोभयसंबंधेन विशिष्टज्ञानत्वस्य कार्यतावच्छेदकत्वेन नित्यसाधारण्याभावाच्च॥
वस्तुतस्तु जन्यप्रत्यक्षमात्रवृत्तिवैजात्यस्वीकृत्य विजातीयविशिष्टज्ञानत्वस्यैव तत्कार्य
तावच्छेदकत्वात्॥ चाक्षुषत्वादिना संकरभयाच्च निर्विकल्पकेपि तद्वैजात्यस्वीकारः॥ अ
तएव जन्यधीजन्यमात्रवृत्तिएतादृशवैजात्यभ्रमत्वाभावाज्जन्यसाक्षात्कारे प्रागुक्त
साक्षात्कारलक्षणस्याव्याप्तिरितिपरास्तं॥ तस्य निर्विकल्पकत्वादिसाधारण्येन जन्य
धीजन्यमात्रवृत्तित्वाभावात् मानसावृत्तित्वाभावाच्च तल्लक्षणे तु मानसावृत्तित्वेन जाते
विशेषणीयत्वादित्युक्तत्वादितिदिक्॥ निर्विकल्पकं निरूप्य क्रमप्राप्तं सविकल्पकं निरू
पयति॥ वैशिष्ट्यावगाहीति॥ संबंधविषयकमित्यर्थः॥ ननु इंद्रियसंबद्धविशेषणता

रूपकारणताबलात् निर्विकल्पकेपि संबंधभाने बाधकाभावात् तस्यापि वैशिष्ट्यावगाहित्व
मस्तीत्यतिव्याप्तिरित्यस्वरसादाह॥ सप्रकारकं वेति। किंचिन्निष्ठप्रकारताशाली सत्यर्थः।
निर्विकल्पके च प्रकारतया घटत्वादेरभानान्नातिव्याप्तिरिति भावः॥ वस्तुतस्तु वैशि
ष्ट्यावगाही सत्यस्य संसर्गमर्यादया वैशिष्ट्यावगाही सत्यर्थः॥ किंचिन्निष्ठसांसर्गिकवि
षयताशालित्वमिति पर्यवसितोऽर्थः॥ ननु किंचिन्निष्ठप्रकारताशालित्वमित्यपि व
क्तुं शक्यत एवेति नकुतो नोक्तमित्यत द्रूपापसानतथेवाह॥ सकौपेरकमिति॥ इदमु
पलक्षणम्॥ किंचिन्निष्ठविशेष्यताशालित्वमपि तत्त्वमित्यपि बोध्यम्॥ ननु सप्रकार
कमित्यत्र प्रकारत्वनिवेशात् किं तत्प्रकारत्वमित्यतस्तन्निरूपयति॥ प्रकारता चेति॥
ज्ञाने इति निरूपितत्वं सप्तम्यर्थः॥ घटत्वादेरिति॥ निष्ठत्वं षष्ठ्यर्थः॥ ज्ञाने निरूपि

॥३१॥

तआ२

सा४

त्नोघटत्वनिष्ठो विषयताविशेषइत्यर्थः॥विषयताविशेषइति विशेष्यतारव्यविषयताप्र
कारतारव्यविषयतासांसर्गिकविषयतारूपत्रिविधविषयताभेदइत्यर्थः॥ननु किं
तत्विषयत्वमोह॥विषयताचेति॥विषयेति॥घटोज्ञानविषयःपटोज्ञानविषय
इत्यनुगतप्रतीतिसाक्षिकइत्यर्थः॥स्वरूपसंबंधविशेषइति॥ज्ञानविषयरूपस्वरूपसं
बंधइत्यर्थः॥ननु विषयतायाःस्वरूपसंबंधत्वांगीकर्तृप्राचीनमते तस्याःज्ञानस्वरू
पत्वंविषयस्वरूपत्वंवा॥नताबद्याद्यः॥ज्ञानरूपत्वे घटभूतलवत्ति विषयतयोरैक्येन घ
टवद्भूतलमिति ज्ञानोत्तरं घटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालि
ज्ञानवानहमित्यनुव्यवसायवद्भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यता
शालिज्ञानवानहमित्याद्यनुव्यवसायापत्तेः॥घटपटाविति समूहालंबनज्ञानस्य

॥३१॥

भ्रमत्वापत्तेश्च तज्ज्ञानस्यैक्येन तत्स्वरूपघटपटादिविषयताया अप्यभेदेन घटत्वाभाववन्निष्ठ
विशेष्यतानिरूपितघटत्वनिष्ठप्रकारताशालिज्ञानत्वरूपभ्रमत्वस्य तत्र सत्वात् ॥ न हि
तीयः ॥ घटभूतलसंयोगाः घटवद्भूतलमिति समूहालंबनविशिष्टबुद्ध्योः विषयत्वाभे
क्येन विषयकृतवैलक्षण्याभावे द्विषयताकृतमेव वैलक्षण्यं वाच्यं ॥ तत्र च विषयता
याविषयरूपत्वेन तत्स्वरूपाणां तासामपि वैलक्षण्याभावात् समूहालंबनविशिष्टबुद्ध्यो
वैलक्षण्यानुपपत्तिर्जागरूकैव ॥ न च समूहालंबनाविषयस्य घटप्रतियोगिकत्व
भूतलानुयोगिकत्वरूपसंबंधसंबंधस्यापि विशिष्टबुद्धिविषयत्वान्न वैलक्षण्यानुप
पत्तिरिति वाच्यं ॥ घटभूतलसंयोगप्रतियोगिकत्वानुयोगिकत्वानीति संबंधसंबंध
विषयकस्यापि समूहालंबनस्य संभवात् ॥ न च समूहालंबने संयोगत्वेन संयोगभा

१८२॥

नाच्चानुपपत्तिरिति वाच्यं॥ घटवद्भूतलं संयोगश्चेति विशिष्टज्ञानस्य तादृशसमूहालंबनाद्वैल
क्षण्यानुपपत्तेरिति तस्याः स्वरूपसंबंधरूपत्वं दुर्वचमिति सत आह॥ पदार्थांतरमिति॥ त
थाचातिरिक्ता या विषयता या विषयभेदेन भिन्नतया न पूर्वोक्ताऽनुपपत्तिरिति भावः॥ के
चित्तु स्वरूपसंबंधरूपाया विषयताया अननुगमेनानुगतप्रत्ययानुपपत्तेरिति सत आह॥ प
दार्थांतरमित्याहुः॥ तदसत्॥ तस्या अतिरिक्तत्वेऽपि तत्तद्विषयभेदेन भिन्नतया अनुगत
प्रत्ययानुपपत्तितादवस्थ्यात्॥ न चानुगतप्रत्ययानुपपत्तिः कथं वारणीयेति वाच्यं॥ विषय
तात्वमेकमंगीकृत्य सर्वैर्हि॥ अत एव घटत्वविशिष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन हेतुता
यां विषयतायाः प्रकारताविशेष्यत्वादिभेदेन भिन्नतया एकस्या निवेशेऽन्यविधविषयताशा
लिङ्गानाद्विशिष्टबुध्यनुत्पत्त्यापत्तिरिति निरस्तम्॥ तत्र विषयतात्वेन प्रकारताविशेष्यतयो

॥३२॥

रत्नुगमे नानुपपन्नभावादिसास्तां विस्तरः ॥ घटं जानातीसादौ ज्ञानजन्यघटनिष्ठज्ञाततारू
पपदार्थांतरमंगीकार्यं ॥ अन्यथा घटस्य कर्मत्वानुपपत्ते ॥ क्रियाजन्यफलशालित
स्यैव कर्मत्वरूपत्वात् तत्र च ज्ञानं निमित्तकारणं समवायिकारणं च घटः तदेव च विष
यत्वमिति निष्कृष्टं भट्टमतमाभादर्शयति ॥ भट्टास्त्विति ॥ ज्ञानजन्यः निमित्तकारण
विधया ज्ञानजन्यः ॥ विषयनिष्ठ इति ॥ समवायेन विषयवृत्तिरित्यर्थः ॥ सैव च ज्ञात
तैव च । संबंधस्वरूपेति ॥ अतिरिक्तसंबंधस्वरूपेत्यर्थः ॥ युक्तं स युक्तिकं एतत् ।
ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदार्थांतरांगीकरणं ॥ अन्यथेति ॥ ज्ञानजन्यवि
षयनिष्ठज्ञाततारूपपदार्थानंगीकारे इत्यर्थः ॥ ज्ञानकर्मत्वमिति ॥ घटं जानातीसा
दौ घटादेः क्रियाजन्यफलशालित्वरूपकर्मत्वमित्यर्थः ॥ क्रियेति ॥ ज्ञानरूपधात्वर्थ

जन्यफलात्वाभावादित्यर्थः॥ विनष्ट इति॥ घटस्य नष्टत्वेन तत्र ज्ञानजन्यज्ञाततायाअसंभ
वादिति भावः॥ तदेवोपपादयति॥ नहीति तत्र विनष्टे घटे तस्यैव घटस्यैवासत्वात् न
ष्टत्वात्॥ ननु यथा मनसा नष्टघटेपि विषयतासंबंधेन ज्ञानमुत्पाद्यते तथा ज्ञानेना
पि तत्र तदुत्पादने बाधकाभावादित्यत आह॥ नचेति॥ समवायिकारणस्य कार्यस
हभावेन हेतुत्वात् घटनाशेन तदुत्पत्तिसंभवः॥ अन्यथा समवायिकारणनाशा
स्य समवेतनाशे हेतुत्वात् ज्ञाततोत्पत्तिद्वितीयक्षण एव तस्यानाशापसाक्षलि
कत्वप्रसंग इति भावः॥ ननु तत्र विषयतायाः ज्ञाततारूपत्वाभावेपि स्वरूपसंबंध
रूपत्वमेवास्तामित्याशंकते॥ तत्रेत्यादिना॥ तत्र नष्टघटस्थले॥ प्रतीतेः॥ ज्ञातो घ
ट इति प्रतीतेः॥ अन्यत्रापीति॥ विद्यमानघटस्थलेपीत्यर्थः॥ स एवास्त्विति॥ स्व

रूपसंबंध एव विषयोऽस्त्वित्यर्थः ॥ अधिके नेति ॥ स्वरूपसंबंधातिरिक्तत्वा तता रूपविषयत्वस्वी
कारेऽलमित्यर्थः ॥ ननु सर्वत्र स्वरूपसंबंधस्य विषयत्वरूपत्वे तस्य ज्ञानजन्यत्वाभावात् घटस्य
क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेन कर्मणि द्वितीयेति सूत्रेण घटं जानाती
त्यादौ घटपदोत्तरं द्वितीयाविभक्त्यनुपपत्तिरित्यत आह ॥ कर्मविभक्तेरपीति ॥ द्वितीयावि
भक्तेरपीत्यर्थः ॥ तद्वदेव नष्टघटस्थलवदेव ॥ तथा च तत्र या नष्टघटस्थले घटपदोत्तरं
द्वितीयोपपत्त्यर्थं गौणमुख्यसाधारणकर्मत्वविशिष्टपरत्वं कर्मणि द्वितीयेति सूत्रस्थ
कर्मपदस्यावश्यमंगीकार्यं ममापि च तेनैव विद्यमानस्थलेपि घटपदोत्तरं द्वितीयोप
पत्तिरिति भावः ॥ एवं च क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेपि सविषय
कवाचकधातुसमभिव्याहृतस्थले विषयत्वरूपं गौणमेव कर्मत्वमिति नानुपपत्तिरि

॥३४॥

तिहृदयं ॥ ननु तन्मतेऽभावो ज्ञात इति प्रतीत्यभावेपि ज्ञाततायाअवश्यमंगीकारात्समवायि
कारणं विना भावकार्योत्पत्त्यसंभव इति न नियमः ॥ तथा च नष्टस्थलेपि नानुपपत्तिरि
त्यत आह ॥ संक्षेप इति ॥ समवायस्यातिरिक्तस्य तैरनंगीकारात् विलक्षणस्वरूप
संबंधेन स्वाश्रयत्वमेव समवायिकारणत्वं ॥ एवं च विलक्षणसंबंधेन स्वाश्रयं वि
नास्वस्यानुत्पत्तिरित्येव नियमः ॥ अभावस्थले च विलक्षणसंबंधेन स्वाश्रयत्व
मभावस्यांगीक्रियते ॥ विलक्षणसंबंधेन स्वाश्रयघटस्यासत्त्वाच्च नष्टघटस्थले
अनुपपत्तिर्जागरूकैवेति भावः ॥ स्वमतावष्टंभेनेदं दूषणमित्यपि केचित् ॥ वस्तुत
स्तु गौणकर्मत्वेनाप्युपपत्तेः ॥ अतिरिक्तज्ञाततायाः प्रमाणाभावान्न तद्रूपत्वं विषय
ताया इत्येवं दूषणं सारं ॥ प्रकारता न विषयताविशेषः ॥ किंतु प्रतियोगित्वमेवेत्यंगीक

॥३४॥

त्तृणं केषांचिन्मतमाह ॥ अन्ये त्वित्यादिना ॥ भासमानं यद्वैशिष्ट्यं संबंधः तत्प्रतियोगित्व
मित्यर्थः ॥ पुरुषइतिज्ञानेस्यि दंडस्य प्रकारत्वापत्तिः ॥ संयोग प्रतियोगित्वस्य सत्वाद
तो भासमानेति ॥ तज्ज्ञाने च दंडप्रतियोगिकसंयोगस्याभानान्नातिव्याप्तिः ॥ प्रतियो
गित्वं च स्वरूपसंबंधविशेष एव ॥ इदमेव संगमयति ॥ अयमिति ॥ घटत्वस्य वैशि
ष्ट्यं घटत्वनिरूपितः समवायः ॥ संयोगो हीति ॥ वस्तुगत्याभासमानो यः संयोगः त
त्प्रतियोगित्वस्य दंडे सत्वात्प्रकारत्वापत्तिरित्यर्थः ॥ ननु तत्प्रतियोगिकत्वेन भासमा
नं यद्वैशिष्ट्यं तत्प्रतियोगित्वमर्थः ॥ समूहालंबनविशिष्टबुद्ध्योः भेदानुपपत्त्यावि
शिष्टज्ञाने प्रतियोगितानुयोगित्वरूपसंबंधसंबंधोपि भासत इत्युपेयते ॥ समू
हालंबने च दंडप्रतियोगित्वैकत्वेन संयोगस्याभानान्नातिव्याप्तिरित्यत आह ॥ दिगि

त्रे

त्ति । तथापि दंडपुरुषदंडप्रतियोगिकसंयोगाद् वृत्तिसमूहालंबनेति व्याप्तिः । न चात्र दंडप्रति
योगिकत्वस्य संबंधसंबंधविधया न भानमिति वाच्यं । तथा सति सांसर्गिकविषय
ताया अतिरिक्तत्वाभ्युपगमे किमपराद्धं प्रकारतया । संबंधसंबंधस्य विशिष्टज्ञा
नविषयत्वे गौरवं च । विषयकृतवैलक्षण्याभावेपि विषयताकृतवैलक्षण्येनै
व ज्ञानानां वैलक्षण्योपपत्तेरित्याद्यूह्यं । तच्चेति । साक्षात्काररूपप्रमाकरणं वे
त्यर्थः । तृतीयानुव्यवसायरूपप्रमाकरणत्वस्य प्रथमानुव्यवसाये सत्वात् हा
नोपादानोपेक्षादिप्रमाकरणत्वस्य निर्विकल्पके सत्वात् सविकल्पकादिरूपप्रमा
करणत्वस्य च चक्षुरादिसंयोगे सत्वात्तस्य बहुविधत्वमिति भ्रमनिराकरणाया
ह । इंद्रियात्मकमिति । चक्षुरादिकमेव प्रत्यक्षं प्रमाणं अन्येषां तु व्यापारत्वमिति भावः । ३५ ॥

वस्तुतस्तुप्रसक्तभ्रमाभ्रमनिराकरणायाह ॥ इंद्रियेति ॥ द्रव्यग्राहकत्वं च द्रव्यविषयकलौ
किकसाक्षात्कारजनकतावच्छेदकधर्मवत्त्वं ॥ तेनोपनीतभानमादाय न मनसि नेंद्रियान्तराव
तिप्रसंगः ॥ अनुपधायकखंडचक्षुःसंग्रहाय जनकतावच्छेदकधर्मवत्त्वं निवेश्यः ।
तद्ग्राहकं च द्रव्यग्राहकं चेत्यर्थः ॥ द्रव्याग्राहकत्वं द्रव्यविषयकलौकिकसाक्षात्कारज
नकतावच्छेदकधर्मशून्यत्वं ॥ तेनानुपधायकखंडचक्षुषि नातिप्रसंगः ॥ तत्रापि चक्षु
ष्ट्वस्य सत्त्वादिति ॥ अन्यदु ॥ द्रव्यग्राहकेतरत् ॥ नन्विति ॥ अंधस्य घटसंन्निकर्षे स्यान्नी
नं जायत एवेत्यतो विप्रकृष्टेति ॥ विदूरवर्त्तीत्यर्थः ॥ तत्र मनः । आत्ममात्रग्राहकमिति ॥
तथा च मनसः आत्मभिन्नाऽग्राहकत्वान्न तेन घटादिग्रहापत्तिरिति भावः ॥ सर्वे
ति ॥ मनः सर्वविषयकज्ञानजनकमिति सिद्धांतभंगप्रसंगादित्यर्थः ॥ सर्वविषय

२

॥३६॥

कमपि॥ सर्वविषयकज्ञानजनकमपि तथा च न तादृशसिद्धांतभंग इति भावः॥ परतंत्रमिति॥
स्वेतरबहिर्विषयकज्ञानजनकसामग्रीसापेक्षमित्यर्थः॥ तथा चाध्यक्षविप्रकृष्टघटादीनां
मनसा नग्रहापत्तिः क्षतत्सहकारिचक्षुरादेरभावादिति भावः॥ किं तत्परमतमाहापर
मिति॥ मीमांसकैः ज्ञानलक्षणासामान्यलक्षणायोगजधर्माद्यस्वीकारान्मनसश्च
क्षुरादींद्रियमात्रसहकारित्वमेवोपेयते॥ अत एवात्मा मनसा संयुज्यते मन इंद्रियेण
इंद्रियमर्थेन इंद्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमादिति संगच्छते इति तन्मतं
निराकर्तुमाह॥ न पुनरिति॥ चक्षुरादिमात्रमिति॥ चक्षुरादिकमेव परमिति पुन न
रित्यन्वयः॥ मात्रपदेन ज्ञानलक्षणादिव्यवच्छेदः॥ तथा च चक्षुरादिव्यापारं विना
पि ज्ञानलक्षणासहकारेण कदाचिन्मनसा ज्ञानजननान्नेषामपि सहकारित्वमा

॥३६॥

वन्नूपकंउपदर्शितनियमस्तुलौकिकप्रत्यक्षस्थलएवेतिभावः॥ ननुज्ञानलक्षणासहकारेण
मनसाज्ञानजननेमानाभावइत्यत आह॥ स्मृतेति॥ संसर्गेति॥ परस्परसंसर्गग्रहादि
त्यर्थः॥ ननुपरस्परसंसर्गाग्रहेकाक्षतिरत आह॥ कथमन्यथेति॥ अन्यथाज्ञानलक्ष
णासहकारेणमनसास्मृतपदार्थानांपरस्परसंसर्गाग्रहेइत्यर्थः॥ कविकाव्यादीनि॥
कविनास्मृतिविषयीभूतपदार्थानांपरस्परंसंसर्गग्रहेकाव्यंविरच्यतेनान्यथा॥ गा
नस्यप्रयोगेवाक्यार्थज्ञानस्यहेतुत्वात्॥ तथाचतदस्वीकारेसंसर्गग्रहाभावेनकाव्यर
चनोच्छेदप्रसंगइतितत्स्वीकारआवश्यकइतिभावः॥ इदमुपलक्षणं॥ लौकिकसंन्नि
कर्षविनापिघटोनास्तीत्यादौअभावांशेघटस्यभानात्॥ एवंसौरभेलौकिकसंन्नि
कर्षंविनापिसुरभिचंदनमितिचाक्षुषोदयाच्चतत्स्वीकारस्यआवश्यकत्वमितिध्येयं॥

लौकिकान्यतद्विषयताशालिप्रत्यक्षत्वावच्छिन्नं प्रति किंचिद्विषयतावच्छिन्नतन्निष्ठप्रकारताशा
लिज्ञानत्वेन हेतुतेति कार्यकारणभावो बोध्यः॥ कार्यतावच्छेदके लौकिकान्यत्वनिवेशात्
प्राथमिकविशिष्टबुद्धौ लौकिकसंन्निकर्षजन्यनिर्विकल्पके च न व्यभिचारः॥ कारणता
वच्छेदके किंचिद्विषयतावच्छिन्नत्वनिवेशाच्च न निर्विकल्पात्कोत्तरमुपनीतभानापत्तिः॥
निर्विकल्पकस्यापुपनायकत्वांगीकारे तु तद्विषयताशालिज्ञानत्वेनैव हेतुतेति बोध्यं॥
सामान्यलक्षणाजन्यज्ञाने व्यभिचारणं तु अव्यवहितोत्तरत्वसंबंधेन कारणवैशिष्ट्यं
निवेश्यैव तद्वृत्तिधर्मप्रकारकज्ञानाजन्यत्वनिवेशो तद्वृत्तिघटत्वद्रव्यत्वादिरूपनाना
धर्मप्रकारकज्ञाननिरूपितजन्यतानामनुगमकरूपाभावादित्थं च कार्यता
वच्छेदके लौकिकान्यत्वानिवेशोपि न क्षतिरिति ध्येयं॥ योगजधर्मसामा

74

यलक्षणा प्रत्यासत्तिस्वीकारे अनुभवमेव प्रमाणयति ॥ योगिनामित्यादिना ॥ योगिनां योगजधर्मसहायेन मनसा चक्षुरादीन्द्रियव्यापारं विनापि सर्वविषयकअलौकिकसाक्षात्कारोदयात्तस्य सहकारित्वमावश्यकमिति भावः ॥ प्रमेयत्वादिति ॥ सर्वत्र प्रमेये चक्षुरादीन्द्रियव्यापारं विनापि प्रमेयत्वेन प्रमेयसामान्यविषयकालौकिकसाक्षात्कारोदयात्तस्यापि सहकारित्वमावश्यकमिति भावः ॥ स्वतंत्रमिति ॥ बहिर्विषयकज्ञानजनकसामग्र्यनपेक्षमित्यर्थः ॥ अबाह्येति ॥ अबाह्यविषयकज्ञानजनने इत्यर्थः ॥ अबाह्यानीति ॥ अयोग्यानीति शेषः ॥ तद्योग्येति ॥ आत्मयोग्यगुणादीत्यर्थः ॥ तदभावः योग्यगुणाभावः ॥ तद्वृत्तीति ॥ आत्मतत्समवेतयोग्यगुणवृत्तिजातिश्चेत्यर्थः ॥ सा चात्मत्वज्ञानत्वादिप्रत्येकत्वेति आत्मैकत्वे परममहत्परिमाणे चेत्यर्थः ॥ द्रव्यसाक्षात्कारसामग्रीसत्वेन ऊनसंख्यापरि

॥३८॥

माणग्राहकसामग्र्या अपि सत्त्वात् इयं साक्षात्कारस्य संख्यापरिमाणविषयकत्वनि
यमेन आत्ममानसे तयोरपि भानसंभवद् इति भावः ॥ नयोग्येति ॥ न लौकिकमाने स
साक्षात्कारविषयीभूतद्रुसर्थः ॥ अत्र च मनःसंयुक्तसमवायरूपकारणबलात् तज्ज्ञा
नादीनामिव तयोरपि मानसे बाधकाभावः ॥ न च तथा सति संस्कारादीनामपि मा
नसापत्तिः ॥ सामग्रीसत्त्वादिति वाच्यं ॥ तत्र ज्ञानाय सा संस्कारस्य प्रातिस्विकरूपेण
विजातीयगुणत्वेन चाप्रतिबंधकत्वकल्पनात् तद्वत् संख्यापरिमाणयोरपि प्रातिस्विक
रूपेण प्रतिबंधकत्वे प्रतिबंधकतावच्छेदकवैजात्यस्वीकारे वा गौरवात् तत्र सक्षेन किं
चिद्बाधकं ॥ न च ज्ञानादियोग्यगुणेष्वेव संस्कारावृत्तं वैजात्यं स्वीकृत्य विजातीयगु
णविषयकमानसं प्रति विजातीयगुणत्वेन हेतुत्वात् तादृशवैजात्यस्येतत्संख्यापरि

२२
॥३८॥

माणयोः स्वीकारे गौरवात्तयोरप्ययोग्यत्वमिति वाच्यं ॥ मनःसंयुक्तसमवायेन विजातीयगु
णे विनापि आत्मत्ववमानसजननाद्विजातीयगुणस्य विशेषसामग्रीत्वासंभवेन सामान्य
सामग्रीबलात् संस्कारप्रत्यक्षापत्तिवारणाय विजातीयगुणभेदत्वेन हेतुताया आव
श्यकत्वात् आत्मत्ववमानसे आत्मत्वेनापि हेतुत्वकल्पने पि ज्ञानसामान्ये सामग्र्याः फलेज
ननीये विजातीयगुणे आत्मत्वान्यतरस्य सहकारित्वकल्पनेन संस्कारप्रत्यक्षापत्तिवा
रणे तु तिगौरवात्तदपेक्षया विजातीयगुणभेदत्वेन कारणताया एवोचितत्वादिति नयोः
प्रत्यक्षस्वीकार एवोचित इत्यस्वरसः टीकाकृता इत्यनेन सूचितः ॥ इत्थमिति ॥ आत्मनः
आत्मसमवेतगुणानां च मनसो योग्यत्वमित्यर्थः ॥ परा[illegible]त्मा पुरुषान्तरीयात्मा । तद्गुणा
श्च परात्मसमवेतगुणाश्चेत्यर्थः ॥ चकारेण गुणसमवेतजात्यादीनां च संग्रहः ॥ समीप

त्व

॥३९॥

तेनेति ॥ परायोग्यत्वात् पुरुषांतरीयमनसोयोग्यत्वात् ॥ आत्ममानसत्वावच्छिन्नंप्रतिविजा
तीयमनःसंयोगत्वेनात्मसमवेतमानसंप्रतिविजातीयमनःसंयुक्तसमवायत्वेनात्म
समवेतसमवेतमानसत्वावच्छिन्नंप्रतिविजातीयमनःसंयुक्तसमवेतसमवायत्वे
नेत्यादिकार्यकारणभावकल्पनात्पुरुषांतरीयात्मान्तरीयमनसोःसंयोगेचवै

न

जात्यानभ्युपगमेननतस्यसाक्षा[illegible]पत्तिरितिभावः ॥ गन्धयोरन्त्रिति ॥ परमाण्वादि
षुचक्षुःसंयोगसत्वादितिभावः ॥ तेषांपरमाण्वादीनां ॥ चक्षुरयोग्यत्वादिति ॥
चक्षुर्जन्यलौकिकसाक्षात्कारायोग्यत्वादित्यर्थः ॥ वक्ष्यमाणलौकिकचाक्षुष
सामग्र्यसत्वादितिभावः ॥ महदित्यादि ॥ द्रव्यवृत्तिलौकिकविषयतासंबंधेनचा
क्षुषंप्रतिसमवायेनमहत्वेनउद्भूतरूपत्वेनचहेतुतेत्यर्थः ॥ परमाणौमहत्वाभा

॥३९॥

वात्॥ आत्मनि रूपाभावात्॥ पिशाचादेश्चोद्भूतरूपवत्त्वाभावात् न तत्संसृष्टमिति त्वे
तुल्यार्थः॥ तदेवाह परमाणुश्चैसादितद्रूपस्य पिशाचादिरूपस्य अनुद्भूतत्वात्॥
उद्भूतभिन्नत्वात्॥ यद्यपि पिशाचादिशरीरस्य वायवीयत्वे न तत्र रूपाभावा
त् तद्रूपस्यानुद्भूतत्वात् तत्संसर्गतं॥ तथापि पिशाचादि[illegible]
प्रदेशतन्निमित्तकारेण पार्थिवोपष्टम्भस्य वायो बोध्य॥ न तु लाघवाद्विजातीयचक्षुःसंयोगत्वेनैव द्रव्यचाक्षु
षं प्रति हेतुत्वं परमाण्वादिचक्षुःसंयोगे च वैजात्यानभ्युपगमात् न तत्र तत्प्रसक्तापत्ति
रिति किमुद्भूतरूपादिहेतुतया॥ न च विजातीयचक्षुःसंयुक्तविशेषणता
याऽभाववाचाक्षुषे हेतुतया वायोरुद्भूतरूपाभावप्रत्यक्षानुरोधेन तत्र विजाती
यचक्षुःसंयोगस्यावश्यकतया वायोश्चाक्षुषापत्तिरिति तत्रोद्भूतरूपहेतुत्व

॥४०॥

स्य

मावच्छेदकमितिवाच्यं । द्रव्यचाक्षुषजनकतावच्छेदकतयावैजात्यांतरस्वीकारस्य च तत्रा
नंगीकारात् । न च तथापि विजातीयचक्षुःसंयोगस्य चक्षुष्यपि सत्त्वात्तत्राचाक्षु
षापत्तिरिति तदनुद्भूतरूपहेतुत्वमावच्छेदकमितिवाच्यं । स्वप्रतियोगिसंयोगस्य+क+
स्वस्मिन्नभावेन चक्षुषि चक्षुःसंयोगात्+प्रतियोगिकत्वाभावादिति चेन्न ॥ विजा
तीयक्रियाया एव विजातीयसंयोगनियामकत्वे यत्रैकस्मिन्नेव चक्षुःक्रियया घटे
+परमाण्वोश्च युगपत्संयोगः तत्र परमाणावपि विजातीयसंयोगस्य दुर्वारतया
तत्प्रत्यक्षापत्तेर्वारणासंभवात् । न च तदुत्तरदेशस्यापि विजातीयसंयोगनि
यामकतया परमाण्वादिरूपोत्तरदेशस्य तत्र नियामकताकल्पनेन न तत्र वि
जातीयसंयोग इति वाच्यं । अनंतोत्तरदेशस्यापि विजातीयसंयोगनियामक

रा

॥४०॥

80

त्वकल्पनापेक्षयामहदुद्भूतरूपादिहेतुताएवोचितत्वादिति दिक् । एकैकसनेनास्वरसः सू-
चितः । सच उद्भूतत्वस्य जातित्वे नीलत्वादिना संकरप्रसंगः । न च नीलत्वादिव्याप्य
नानैवोद्भूतत्वमिति वाच्यं । तथा सति चाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपत्वेन कारण-
त्वानुपपत्तेः कारणाननुगमेन व्यभिचारादिति । अनुद्भूतत्वेति । न च नीलत्वादि
नासांकर्यमत्रापीति वाच्यं । नीलत्वव्याप्यनानानुद्भूतत्वस्यैवोपगमात् । अनुद्भू-
तत्वाभावकूटविशिष्टरूपत्वेन च प्रत्यक्षं प्रति हेतुत्वेन व्यभिचाराभावादित्या-
ति भावः । प्रसंगात् चक्षुर्योग्यगुणानाह । योग्यगुणादृत्यादिना । योग्यदृष्यरूप-
मिति । चक्षुर्योग्यद्रव्यवृत्तिरूपमित्यर्थः । तन्मात्रेति । योग्यद्रव्यमात्रवृत्तीत्यर्थः ।
ननु तन्मात्रवृत्तीत्यत्र मात्रपदमनर्थकमित्यत आह । मात्रापदमिति । घटाकाशा-

॥४१॥

संयोगस्याकाशेऽपि वृत्तित्वान्न योग्यद्रव्यमात्रवृत्तित्वमिति भावः ॥ ननु त्वाचप्रत्यक्षे त्वक्संयो-
गस्य हेतुत्वात् परमाणुवायुप्रभृतीनां स्पार्शनापत्तिरिति त्वगिंद्रिययोग्यमेव द्रव्यं त्वचा ग्र-
ह्यत इत्येव वाच्यं ॥ तत्र किं तद्योग्यमिति हृदिस्थशंकायामाह ॥ त्वच इति ॥ महदित्यादि ॥
तथा च द्रव्यवृत्तिलौकिकविषयतासंबंधेन त्वाचप्रत्यक्षं प्रति महत्त्वेनोद्भूतरूपत्वेनो-
द्भूतस्पर्शत्वेन च हेतुत्वान्न तत्प्रत्यक्षापत्तिरिति भावः ॥ सामान्यतो बहिरिंद्रियप्रत्यक्ष-
त्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन हेतुत्वात्त्वाचप्रत्यक्षेऽपि रूपं हेतुः तेन न वायोः प्रत्यक्षमि-
ति हृदयं ॥ यथाक्रममिति परमाण्वादिप्रत्यक्षं वारयति ॥ तेनेत्यादिना ॥ प्रभाया इति ॥ न च
प्रभायां हि तेजसो रूपमित्यनेन प्रभाया रूपवत्त्वमेव न तु द्रव्यत्वमिति वाच्यं ॥ तदन्यमता-
नुसारेणैव तदुक्तत्वादिति ॥ प्रसंगात्त्वगिंद्रिययोग्यगुणानाह ॥ गुणाश्चेत्यादि ॥

॥४१॥

त्वचोयोग्या इति शेषः ॥ चक्षुषो योग्यस्या ॥ रूपस्यापि त्वचा ग्रहणप्रसंगात् रूपातिरि
क्ता इति ॥ महदुद्भूतस्पर्शवन्मात्रेति ॥ तन्मात्रवृत्तित्वं च तदितरावृत्तित्वे सति तद्वृत्ति
त्वं ॥ महदुद्भूतस्पर्शश्चेति ॥ सामाना- धिकरण्येन महत्वविशिष्टउद्भूतस्पर्शश्चे
त्यर्थः ॥ ननु चक्षुषो योग्या इति विशेषणं व्यर्थं अत आह ॥ अत एव ॥ चक्षुषो योग्य
त्वविशेषणादेव ॥ वाय्विति ॥ वायुपरिमाणस्य चक्षुरयोग्यत्वादिति भावः ॥ ननु उ
द्भूतस्पर्शवद्वृत्तेश्चक्षुर्योग्यगुणस्यैवाप्रसिद्धत्वात् तेनैव तत्प्रत्यक्षापत्तिवारणे कृ
तं महदित्यादिविशेषणेनेत्यत आह ॥ नवेति ॥ तथा च प्रभापरिमाणस्य चक्षुर्योग्यत्वा
त्तस्यापि त्वाचप्रत्यक्षापत्तिरतस्तद्विशेषणमावश्यकमेवेति भावः ॥ न च चक्षुर्योग्य
त्वविशेषणेनैव परमाणुगुणप्रत्यक्षवारणे अत्र पृथक् महदिति विशेषणं वैयर्थ्यमि

॥४२॥

तिवाच्यं ॥ त्रुटिपरिमाणस्यास्पार्शनप्रत्यक्षवारणाय प्रकृष्टमहत्त्वयोः परत्वयात्तदुपादान
स्यावश्यकत्वात् ॥ मात्रपदव्यावृत्तिमाह ॥ नवा घटेति ॥ उद्भूतस्पर्शवन्मात्रावृत्ति
त्वादुद्भूतस्पर्शवदितरवृत्तित्वात्तथा च नवृत्तिद्वितरावृत्तित्वे रूपं तन्मात्रवृत्तित्वं
नस्येति भावः ॥ तत्र हि प्रभायां हि ॥ कर्म चेति ॥ त्वग्योग्यद्रव्यसमवेतकर्मत्वं चोयो
ग्यमित्यर्थः ॥ वायोरपि स्पार्शनप्रत्यक्षवादिमीमांसकमतं दूषयति ॥ मीमांसका
स्त्वित्यादिना ॥ लाघवात् ॥ त्वाचप्रत्यक्षे रूपस्य हेतुत्वाकल्पनेन लाघवात् ॥ महदि
ति ॥ महत्त्वविशिष्टोद्भूतरूपमित्यर्थः ॥ तत्प्रयोजकत्वाच्च प्रत्यक्षप्रयोजकं ॥ गौ
रवात् प्रभास्पार्शनवारणायोद्भूतस्पर्शहेतुत्वावश्यकतया त्वाचप्रत्यक्षं प्रति रूप
स्य हेतुत्वे गौरवात् ॥ अनद्भूतेति ॥ उद्भूतरूपस्य त्वाचप्रत्यक्षाप्रयोजकत्वादित्यर्थः ॥ व

॥४२॥

84

हिरिंद्रियेति ॥ आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिंद्रियजन्यत्वनिवेशः ॥ अत एव ननि
स साधारण्यमपीति भावः ॥ तदभावात् उद्भूतरूपाभावात् ॥ नैवमिति ॥ नवायोः स्पा
र्शनप्रत्यक्षमिति भावः ॥ लाघवादिति ॥ बहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वापेक्ष
याद्रव्यचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वे लाघवादित्यर्थः ॥ अत्र मीमांसकानां
मयमाशयः ॥ आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिंद्रियजन्यद्रव्यप्रत्यक्षस्य त्व
कार्यतावच्छेदकत्वे गौरवात् उद्भूतरूपस्य कार्यतावच्छेदकं बहिरिंद्रियजन्यद्रव्यप्रत्यक्ष
ब७ त्वं वाच्यं तत्रैहिष्टुमात्मान्यत्वं वा मानसविषयान्यत्वं वेति विनिगमनाविरहः ॥ अ
थ मूर्त्तप्रत्यक्षत्वमेव तत्कार्यतावच्छेदकं ॥ स्पर्शसमवायिकारणतावच्छेदकतया
मूर्त्तत्वं जातिरिति सिद्धं चेत् तथापि प्रभायाः स्पार्शनवारणाय उद्भूतस्पर्शस्य स्पा

85

॥८३॥

र्शनेप्रतिहेतुत्वावश्यकतया चाक्षुषत्वमेव रूपजन्यतावच्छेदकमुपेयते ॥ ननु मूर्त्तप्र
त्यक्षत्वं ॥ वायोः प्रत्यक्षत्वसंदेहेन तस्य संदिग्धव्यभिचारकत्वात् ॥ न तूक्तोपरि
त्यज्य निश्चिताव्यभिचारकं तु संगृह्यमाणव्यभिचारकेण कार्यत्वकल्पनाया
अयोग्यादिति ॥ तथा च वायोः स्पार्शने बाधकाभावः ॥ साधिका च समीरोयं मं
दो विहरतीत्यादिप्रतीतिः ॥ न चोद्भूतस्पर्शेन वायोरनुमानान्न तादृशप्रतीत्य
नुपपत्तिरिति वाच्यं ॥ व्याप्त्यादिप्रतिसंधानं विनापि तादृशप्रतीतेर्जायमानत्वात् ॥
अन्यथा घटं स्पृशामीत्यादिप्रतीतेरनुमानादिनैवोपपत्तौ घटादीनामपि स्पा
र्शनोच्छेदापत्तेरिति ॥ अत्राहुर्नैयायिकाः ॥ कारणाभावात् कार्याभाव इति प्र
तीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वं ॥ तत्रैव मूर्त्तप्रत्यक्षत्वावच्छि

च

॥८३॥

क्षा

त्वं प्रति उद्भूतरूपत्वेनाहेतुत्वे प्रत्यक्षसामान्याभावे उद्भूतरूपाभावस्योद्भूतस्पर्शाभावस्येति विशे
षाभावकूटस्य प्रयोजकत्वं वाच्यमिति गौरवात् ॥ मन्मते चोद्भूतरूपाभावस्येति लाघवं उ
द्भूतरूपत्वेनाकारणत्वे चेतद्वच्छिन्नाभावस्य प्रयोजकत्वासंभवात्तद्धेतुत्वमावश्यकमेव ॥
ननु तर्हि उद्भूतस्पर्शत्वेन हेतुत्वमास्थाय विनिगमनाविरहः । भवन्मते वायोरिव मन्मतेपि
प्रभायाः प्रत्यक्षेनंगीकारादिति चेन्न ॥ इह उपरि देशे विहंगम इत्यत्र तु प्रभामंडलस्यैवोपरि
देशतया तस्य च प्रत्यक्षानंगीकारे इह विहंगम इति प्रतीत्यनुपपत्तेः ॥ संयोगप्रत्यक्षे या
वदाश्रयप्रत्यक्षस्य हेतुत्वात् ॥ एवं संयोगविभागलिंगकं चेद्गतागतादौ गत्यनुमानेन स्या
त् ॥ न च पूर्वोत्तरदेशयोर्ध्वंसादेरुपलंभानुपलंभाभ्यां संयोगविभागयोरनुमानात्ता
भ्यां गत्यनुमानं स्यादिति वाच्यं ॥ प्रभामंडलरूपयोस्तयोर्भवन्मतेऽप्रत्यक्षत्वात् तस्मा

स्रमायाश्चास्तु संयोगीकारस्यावश्यकत्वात् उद्भूतस्पर्शत्वेन कारणासंभवः ॥ न च मूर्त
प्रत्यक्षत्वस्य नित्यसाधारण्यात् कथं जन्यतावच्छेदकत्वमिति वाच्यं ॥ समवायकालि
क विशेषणतोभयसंबंधेन प्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वात् ॥ एवंरीसासिद्धेका
र्यकारणभावे वायो रूपाभावेन न तत्प्रत्यक्षत्वमिति ॥ वायुर्वातीति प्रतीतिरनुमाना
द्दिनैवोपपादनीया ॥ घटादौ चोद्भूतरूपसत्वेन तत्वनीतेः प्रत्यक्षत्वमेवेति ॥ ननु
गगनघटसंयोगस्पार्शननिवारणाय विजातीयस्पार्शनं प्रति सामानाधिकरण्यसं
बंधेन स्पार्शनाभावस्य प्रतिबंधकत्वावश्यकतया वायोः स्पार्शने वायुस्पर्शस्पार्शं
नानुपपत्तिः ॥ चतुरणुकस्पार्शने व्यभिचारवारणाय सति विजातीयत्वनिवेशः ॥
वैजात्यं चेदं द्रव्यत्वव्याप्यत्वं गुणकर्मसाधारणं ॥ न च प्रतिबध्यतावच्छेदककोटौ विजाती

यसति स्पर्शान्यत्वनिवेशान्नानुपपत्तिरिति वाच्यं ॥ तथा सति विजातीयसत्व स्पर्शान्यत्वयो
र्विशेषण विशेष्यभावे विनिगमनाविरह प्रसंगात् ॥ एवं त्वक्संयुक्तसमवायरूपसामा
न्यसामग्र्या स्पार्शनाभावाभावरूपकारणं विना वायुस्पर्शस्पार्शनजननात्तस्य विशे
षसामग्रीत्वासंभवेन त्वक्संयुक्तसमवायरूपसामग्रीबलात् गगनघटसंयोगस्पार्श
नापत्तेर्दुर्वारत्वाच्च ॥ न च स्पर्शस्पार्शनं प्रति स्पर्शत्वेनापि हेतुत्वं कल्पयित्वा सामा
न्यसामग्र्या द्रव्यसमवेतस्पार्शनत्वावछिन्नजननीये स्पार्शनाभावाभाव स्पर्शयोर
न्यतरस्य सहकारित्वकल्पनान्नानुपपत्तिरिति वाच्यं ॥ तथा सति प्रतिबध्यतावछे
दककोटौ स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च वायोरप्रसक्षत्वादिम
ते गौरवादिति वायुप्रसक्षत्वस्वीकार एवोचितमिति चेन्नैवं ॥ तादृशप्रतिबंधकाभावं

॥४५॥

विनापित्वक्संयुक्तसमवायेन द्रव्यत्वस्पार्शनजननात्तस्य विशेषसामग्रीत्वासंभवेन सा
मान्यसामग्रीबलात् गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वात् ॥ सद्भिन्नस्पार्शनं
प्रतिसद्भिन्नत्वेनापि कारणत्वं कल्पयित्वा सामान्यसामग्र्या फले जननीये तादृशप्र
तिबंधकाभावसद्भिन्नयोरन्यतरस्य सहकारित्वकल्पनादापत्तिवारणे तु तिगौर
वात् तदपेक्षया गगनघटसंयोगस्पार्शनवारणाय स्पार्शनाभाव विशिष्ट विजा
तीयसत्वेनैव तादात्म्येन प्रतिबंधकत्वौचित्यात् ॥ विजातीयसत्वे स्पार्शनाभाव वैशि
ष्ट्यं च सामानाधिकरण्य घटित सामानाधिकरण्यसंबंधेन ॥ न च विजातीयसत्व
स्पार्शनाभावयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहः इति वाच्यं ॥ विजाती
यसत्व विशिष्ट स्पार्शनाभावत्वेन प्रतिबंधकत्वे सामानाधिकरण्यस्यैव प्रतिबंधक

॥४५॥

तावच्छेदकसंबंधतयागौरवात् । स्पार्शनाभावविशिष्टविजातीयसत्वेन प्रतिबंधकत्वे
तु नाशस्यैव प्रतिबंधकतावच्छेदकतयालाघवात् । प्रतिबध्यतावच्छेदकं च स्पर्शा
न्यस्पार्शनत्वं । तेन वायोरप्रत्यक्षत्वेपि न तत्स्पर्शस्पार्शने व्यभिचारः । न च तादृश
प्रतिबंधकाभावं विनापि वायुस्पर्शस्पार्शनजननात्तत्स्य विशेषसामग्रीत्वासंभ
वेन सामान्यसामग्रीबलाद्गगनघटसंयोगस्पार्शनापत्तिरिति वाच्यं । स्पर्श
स्पार्शनं प्रति स्पर्शत्वेनापि हेतुताकल्पनेन सामान्यसामग्र्याः फलेजननीये
स्पर्शतथाविधप्रतिबंधकाभावयोरन्यतरस्य सहकारित्वोपगमात् । न च प्र
तिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वे कल्पने न च वायोः
प्रत्यक्षत्वानंगीकारे गौरवात् वायुप्रत्यक्षतास्वीकार एवोचित इति वाच्यं । वायु

प्रत्यक्षत्वानंगीकारे प्रकारांतरेण लाघवसंभवात्॥ तथाहि॥ परमाण्वादिघटितसन्नि-
कर्षबलात् द्व्यणुकत्वस्पार्शनवारणाय द्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्श-
नवत्समवायत्वेन हेतुत्वं वाच्यं॥ तत्र चतुरणुकस्पार्शने व्यभिचारवारणाय द्रव्या-
न्यद्रव्यसमवेतस्पार्शनत्वं कार्यतावच्छेदकमुपेयं॥ तस्य च सन्निकृष्टद्रव्यसमवेतस्पा-
र्शनत्वस्य कार्यतावच्छेदकत्वमादाय विनिगमनाविरहः॥ वायोरप्रत्यक्षत्वे तु वा-
युस्पार्शने स्पार्शने व्यभिचारेण द्व्यणुकान्यद्रव्यसमवेतस्पार्शनत्वस्य कार्यताव-
च्छेदकत्वासंभवेन सन्निकृष्टद्रव्यसमवेतस्पार्शनत्वस्यैव कार्यतावच्छेदकतया वि-
निगमनाविरहासंभवात्॥ न चैवमसंनिकृष्टगुणकर्मस्पार्शनापत्तिरिति वा-
च्यं॥ एकाश्रयघटितसन्निकर्षात् द्वित्वादिप्रत्यक्षवारणाय विजातीयसत्स्पार्श-

॥४६॥

नं प्रतिसामानाधिकरण्यसंबंधेन त्वक्संयोगाभावस्य प्रतिबंधकत्वावै कतयातेनैवासन्नि रूय १
कृष्टगुणकर्मस्पार्शनापत्तिवारणसंभवात् । नचैवं त्वक्संयुक्तसमवायहेतुतायामे
व बीजाभावः येन तत्कार्यतावच्छेदके विनिगमनाविरहः । वायुप्रत्यक्षतावादिमते प्र
सज्येतेति वाच्यं । असन्निकृष्टद्रव्यत्वादिस्पार्शनवारणाय त्वक्संयुक्तस्पार्शनं व स
मवायत्वेन सन्निकृष्टद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रति हेतुता । तत्र चैवं द्रव्यान्यद्र न
व्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहः । वायोरप्रत्यक्षत्वेन वायुस्पर्शस्पा
र्शने व्यभिचारात् । वायुप्रत्यक्षत्ववादिमते तु द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय
विनिगमनाविरहेण अनंतपुरुषभेदभिन्नानंतसंन्निकर्षहेतुत्वकल्पनापत्तेर्वायोर
प्रत्यक्षत्वांगीकारएवोचितः । एतन्मतेउक्तरूपेण स्पर्शनत्वनिवेशो न स्पर्शत्वेन हे

॥४७॥

(स्पर्शजनकृतिः)

तुत्वकल्पनेन च क्रियत्गौरवसंभवेपि पुरुषभेदभिन्नसन्निकर्षहेतुत्वकल्पनापेक्षया लाघ
वानपायादिति सिद्धांतानुयायीपंथाः॥ न वास्तु॥ असन्निकृष्टद्रव्यत्वस्पार्शनवार
णाय पुरुषभेदभिन्नसन्निकर्षहेतुत्वं नोपेयते॥ अपितु सन्निकृष्टद्रव्यसमवेतस्पा
र्शनं प्रति स्व[illegible]वृत्तिप्रागभावप्रतियोगित्वविशिष्टयत्स्ववृत्तिस्पार्शनं विषयतासंबं
धेन तद्घटत्तत्समवेतत्वसंबंधेन कृतित्वेनैव कारणत्वं॥ स्ववृत्तित्वं च कालिक
संबंधेन॥ एवं च वायुप्रत्यक्षत्वस्वीकारे पुरुषभेदभिन्नसन्निकर्षहेतुतायां तत्का
र्यतावच्छेदके उपदर्शितगौरवस्यानवकाशः तद्धेतुत्वस्यैवाकल्पनात्॥ न च कृतिका
र्यतावच्छेदके द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरह इति वाच्यं॥
भवन्मते स्पार्शनत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च गौरवस्यातिस्फुटत्वात्॥ ॥४७॥

वस्तुतस्तु । व्यापकधर्मेण कारणताया इव कार्यताया अपि अकल्पनात् । द्रव्यान्यद्रव्यसमवेत
स्पार्शनत्वेन कार्यतावच्छेदकत्वासंभवात् सद्भिन्नस्पार्शनत्वस्यैव वायुप्रत्यक्षतावादि
मतेपि सन्निकर्षकार्यतावच्छेदकत्वादित्याहुः । वस्तुतस्तु । गुरुत्वाद्यतीन्द्रियप्रत्यक्षवा
रणाय तेषां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवाल्लाघवेन विषयत्वेनैव लौकिकप्रत्यक्षे
हेतुत्वं । विषयत्वं च लौकिकविषयतया साक्षात्कारवत्त्वमेव । तथा च तेनैव गगनघ
टसंयोगस्पार्शनवारणे न तदनुरोधेन विजातीयसत्स्पार्शनं प्रति स्पार्शनाभावप्रति
बंधकत्वमिति न वायुस्पर्शस्पार्शनानुपपत्तिः । न चैवं विषयत्वाभावादेव नीरूपप्रत्य
क्षवारणे रूपहेतुत्वमनावश्यकमिति वाच्यं । घटादेः पाकादिना नीरूपतादशायां लौकि
कप्रत्यक्षतापत्तेः रूपहेतुत्वस्यावश्यकत्वादित्यलमप्रकृतविचारेण । समवायानीन्द्रि

॥४७॥

यत्त्वादिमं वैशेषिकमतं दूषयितुं तन्मतमुपन्यस्यति ॥ वैशेषिकास्त्विति ॥ न प्रत्यक्षमनेंद्रि
यजन्यलौकिकसाक्षात्कारे विषयः ॥ संबंधप्रत्यक्षमिति ॥ संबंधत्वस्य समवायसाधा
रणत्वादिति भावः ॥ ननु तादृशकार्यकारणभावे मानाभावइत्यत आह ॥ कथमन्यथे
ति ॥ अन्यथा तादृशकार्यकारणभावाकल्पने ॥ न प्रत्यक्षमिति ॥ तत्रापि चक्षुःसंयुक्तस
मवायरूपकारणसत्त्वेन द्रव्यसमवेतचाक्षुषापत्तेरिति भावः ॥ न चेति ॥ न हीत्यर्थः ॥
तथा हेतुतायामिति ॥ संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षत्वेन हेतुतायामित्यर्थः ॥ घटाका
शसंयोगप्रत्यक्षापत्तिर्वोरमानमित्यात्रांस्य निराचष्टे ॥ न चेत्यादि ॥ योग्येति ॥ द्रव्यत्वादि
जातेर्योग्यमात्रसमवेतत्वाभावाद्योग्यत्वं न स्यात् ॥ अतो गुणस्येति ॥ योग्यत्वादिति ॥
घटाकाशसंयोगस्य चायोग्याकाशावृत्तित्वेनायोग्यत्वादिति भावः ॥ नन्वेवं वायुस्प ॥४७॥

द्रिस्पर्शाद्रूपस्य च प्रत्यक्षं न स्यात् । तयोरयोग्यवृत्तित्वादित्यत आह । किं चेति । लाघवात् ।
संबंधप्रत्यक्षत्वापेक्षया लाघवात् । लाघवमेवाह । संबंधत्वं हीति । संयोगत्वस्य जाति
रूपतया लाघवमस्त्येवेति भावः । घ्राणग्राह्यगुणमाह । घ्राणग्राह्य इति । तदुक्तं
गंधगतं । सामान्यं च गंधत्वादित्यतयोः गंधगंधत्वयोः । अत एव गंधे महत्त्वसामानाधि
करण्यविशेषणादेव । उद्भूतत्वविशेषणमावृत्तिमाह । न वेति । रसनयोग्यगुणमा
ह । रसनेति । श्रवणयोग्यगुणमाह । श्रवणेति । ननु चक्षुरादीनां द्रव्यग्राहकत्वे
निमीलितनयनस्यापि तद्ग्रहापत्तिरत आह । तस्य चेति । सन्निकृष्टार्थग्राहकत्वा
त् । सन्निकृष्टार्थमात्रग्राहकत्वात् । असन्निकृष्टार्थाग्राहकत्वादिति यावत् । स
हकारिणः प्रत्यक्षे जननीयेपेक्षणीयाः । तथा चेंद्रियसंयोगादेरपि प्रत्यक्षहेतुतया

॥४९॥

वे ३

ननिमीलितनयनस्य प्रसक्त्यापत्तिरिति भावः ॥ नन्विंद्रियत्वस्य तेजस्त्वादिना संकरेणजा
तित्वासंभवेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रतींद्रियत्वसंयोगयोर्हेतुत्वमि
ति चेन्न ॥ इंद्रियनिष्ठैकत्वेषुंजासं ख्याद्यसविजातीयैकत्ववत्त्वेनैव तद्धेतुत्वात् ॥ न च च
क्षुःसंयोगद्वगुणयोः स्पार्शनवारणाय त्वक्संयोगद्वगुणयोश्च चाक्षुषवारणाय चक्षुः
स्त्वक्संयोगयोश्चाक्षुषस्पार्शनहेतुत्वावश्यकत्वेंद्रियसंयोगादेः प्रत्यक्षसामान्यहे
तुत्वे मानाभाव इति वाच्यं ॥ प्रत्यक्षसामान्यानुसारे चक्षुःसंयोगाभाववत्त्वक्संयोगा
भावादीनां प्रयोजकत्वे गौरवाल्लाघवेनेंद्रियसंयोगाभावस्यैव प्रयोजकत्वेनेंद्रियसंयो
गहेतुत्वावश्यकत्वात् ॥ अकारणविरहस्य कार्यविरहाप्रयोजकत्वात् ॥ इंद्रियसंयोग
स्य संयोगेनेंद्रियस्य वा हेतुत्वमिति विनिगमनाविरहादिंद्रियत्वेनापि तद्धेतुत्वमिति ॥ ॥४९॥

ननु सर्वेषामेव सन्निकर्षाणां द्रव्यादिग्राहकत्वे आत्मनः प्रत्यक्षानुपपत्तिस्तत्र संयुक्तस
मवायाभावात् ॥ एवं रूपादेरपि ॥ तत्र संयोगाभावादिति ॥ प्रत्येकमेव द्रव्यादिग्राहकत्व
व्याप्तात्रैकेन किं गत्यन्तरं तिष्ठति ॥ अथ केनेति ॥ उत्तरयति द्रव्यमिति ॥ संयुक्तस
मवायस्य गुणमात्रग्राहकत्वे शब्दग्रहो न स्यात् ॥ स्वस्मिन्स्वप्रतियोगिकं संयोगाभा
वेन श्रोत्रसंयुक्तसमवायस्य शब्दे सत्वादत आह ॥ शब्देतरेति ॥ जातिशब्दसत्वादिः सं
युक्तसमवेतसमवायस्य शब्दत्वेऽसत्वाच्छब्दत्वग्रहानुपपत्तेः शब्देतरेति गुणे विशेष
णं ॥ तत्र समवायेऽभावे च ॥ तथा च पंचविधसन्निकर्षाभावेन विशेषणतयैत ऊह
इति भावः ॥ तस्य शब्दाभावस्य सर्थः ॥ अग्रे च तस्य घटाभावस्य सर्थः ॥ ननु इंद्रियस
न्निकृष्टविशेषणतां इंद्रियसंयुक्तविशेषणतां ॥ तथा च रूपादौ रसत्वाभावग्रहानुपप

॥५०॥

त्तिरत आह ॥ इंद्रियसन्निकर्ष इति ॥ बहुविधेति ॥ इंद्रियसन्निकर्षविशेषणता ॥ इंद्रियसंयु
क्तसमवेतविशेषणतेत्या शरीरसावोधाद् इंद्रियसंयुक्तसमवेतविशेषणतया रूपादेर
सत्त्वाभावग्रहसंभवान्नानुपपत्तिरिति भावः ॥ बहुत्वात् ॥ संयुक्तसमवायादिभेदेन ब
हुविधत्वात् ॥ ननु रूपादिग्रहार्थमवश्यमभ्युपेयेतया संयुक्तसमवायप्रत्यासत्त्यैव
घटादिग्रहोपपत्तेरलं संयोगस्य प्रत्यासत्तित्वेनेत्याशंकते ॥ नन्विति ॥ नप्रत्यासत्तिः ॥
द्रव्य ॥ ग्राहकप्रत्यासत्तिः मानाभावादिति शेषः ॥ ननु घटादिग्रहानुपपत्तिरेव तत्र मा
नं ॥ अथ नत आह ॥ संयुक्तेति ॥ तदसंभवात् संयुक्तसमवायासंभवात् ॥ तस्य आत्मनश्च
नथा चात्मप्रत्यक्षे संयोगहेतुताया आवश्यकत्वेन तत्रैव द्रव्यप्रत्यक्षत्वमेव तज्जन्यता
वच्छेदकमुपेयतेइति भावः ॥ ननु द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तस ॥५०॥

मवायहेतुत्वेन तत्र एवोपपत्तेरलं चक्षुःसंयोगहेतुत्वेन ॥ यद्विच आलप्रत्यक्षे रूपत्वात्सा
मान्यतो द्रव्यप्रत्यक्षत्वमेव जन्यतावच्छेदकमुररीक्रियते ॥ तदा सहस्रस्पर्शमेव तथास्तु ॥ ९२
न च सत्यसिद्धत्वस्य तथात्वे रूपादिचाक्षुषानुपपत्तिरित्यन्यथानुपपत्तिरेवतत्र
बाधिकेतिवाच्यं ॥ तथा सति चक्षुःसंयुक्तसमवायेनैव घटादिचाक्षुषोपपत्ते
र्द्रव्यप्रत्यक्षत्वं जन्यतावच्छेदकं ॥ साधकाभावस्यैव प्रकृते बाधकत्वादित्यतआ
ह ॥ संक्षेपइति ॥ चक्षुःसंयुक्तसमवायस्य त्र्यणुकादिरूपेपि सत्वात्तच्चाक्षुषापत्ते
श्चक्षुःसंयुक्तचाक्षुषवन्निरूपितसमवायत्वेन हेतुत्वं वाच्यं तत्र त्रुटिचाक्षुषे व्यभि
चारवारणाय द्रव्यान्यसच्चाक्षुषत्वस्य विजातीयसच्चाक्षुषत्वस्य वा तज्जन्य
तावच्छेदकत्वमुपेयं ॥ एवं च त्रुटिचाक्षुषस्यासंग्रहीतत्वया चक्षुःसंयोगहेतुताव

॥५२॥

रयकीतिहृदयं ॥ संयोगप्रत्यासत्तेरिति ॥ परमाणौ महत्त्वं नास्तीति प्रसंगात्परमाणावि
व घटे आलोको नास्तीति प्रसंगात् घटेपि चक्षुःसंयोगस्यान्वयकत्वात् चक्षुःसंब
द्धविशेषणताया एवाभावग्राहकत्वादिति भावः ॥ महदुद्भूतेति ॥ महत्वविशिष्टोद्भू
तरूपविशिष्टालोकनिरूपितसंयोगः द्रव्यचाक्षुषप्रत्यक्षे कारणमित्यर्थः ॥ सद्भू
ति ॥ महदुद्भूतरूपालोकसंयोगइत्यर्थः ॥ नन्वेवमिति ॥ एवमालोकप्रतियोगिक
संयोगस्यहेतुत्वे ॥ तेजःसंयोगाभावात् तेजोंतरप्रतियोगिकसंयोगाभावात्स्व
स्मिन्स्वप्रतियोगिकसंयोगानभ्युपगमादितिभावः ॥ तत्प्रभा ॥ प्रदीपप्रभा ॥ प्रदीपे प्र
भायां दीपसंयोगस्यैव सत्वा[illegible] इतो मणिप्रभादाविति ॥ मणेः पार्थिवत्वेन तत्संयोग
स्याहेतुत्वादिति भावः ॥ ननु मणिप्रभायां सौरालोकसंयोगस्यैव सत्वादत आह ॥ द्रव्य ॥५२॥

न २

ते च्चेति॥ महांधकार इत्स नैसोरालोकव्यवच्छेदः॥ अंधकारे घटादिप्रत्यक्षापत्तिवारणा
यतत्रालोकसंयोगस्य हेतुत्वमास्तां आलोकप्रत्यक्षे तु तद्धेतुत्वे मानाभावः॥ अंधका
रेपि तस्य प्रत्यक्षोदयात्॥ अत आलोकभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव तस्य हेतुत्वम
तो न व्यभिचार इत्याशंकते॥ अथेति॥ सुवर्णेति॥ सुवर्णस्यालोकभिन्नत्वाभावेन त
च्चाक्षुषस्यालोकसंयोगकार्यतावच्छेदकानाक्रांतत्वादिति भावः॥ आलोकसंयोग
इति॥ आलोकनिष्ठसंयोगो हेतुरित्यर्थः॥ यत्रालोकवति भूतले घट आनीतस्तत्रा
लोकप्रतियोगिसंयोगाभावात् आलोकवृत्तिसंयोगत्वेनैव हेतुत्वादिति भावः॥ त
स्यालोकसंयोगस्य द्विष्ठत्वादालोकआलोकभिन्नोभयवृत्तित्वात्॥ एवमुक्तरीत्यालो
क संयोगस्यालोकेपि सत्त्वात्॥ सुवर्णेति॥ तत्राप्यालोकाकाशसंयोगस्य सत्त्वादिति भावः॥

कृ

।५४।

अनभिभूतेति। अनभिभूतं रूपं यस्येति मुसहा। अनभिभूत रूपविशिष्टालोक संयो-
गस्य हेतुत्वात् सुवर्णेति दसंभवः। स्वर्णरूपस्याभिभूतत्वात्। तथा च द्रव्यचाक्षुषत्वा
वच्छिन्नं प्रति अनभिभूतोद्भूत रूपविशिष्टालोक संयोगस्य हेतुत्वमिति भावः। अन्य
था सुवर्णरूपस्यानभिभूतत्वे ऽव्याप्त रेति। अंधकारे घटादौ सुवर्णसंयोगात्
घटग्रहापत्तेरिति। अभिभूतत्वे तस्येति भावः। बलवत्सजातीय ग्रहणकृतमग्रहणं
चाभिभवइति। संप्रदायविदस्त्वित्यादि। आलोकेतरद्रव्यचाक्षुषे आलोकसंयोग
स्य हेतुत्वे अंधकारे सुवर्णसाक्षात्कारापत्तिरिति। अतः सुवर्णभिन्नत्वमालोके विशे
षणं। तथा च सुवर्णभिन्नं यत्तेजः तद्भिन्नं द्रव्यं सुवर्णं घटादि च। तत्सक्षे आलोकप्र
तियोगिक संयोगो हेतुः। अतो नांधकारे सुवर्णादिसाक्षात्कार इत्साखंडलार्थः।।

।५२।

कार्यतावच्छेदके गौरवमत्रास्वरसः ॥ केचित्तु द्रव्यचाक्षुषे आलोकसंयोगस्य प्रभासंयोग
त्वेनैव हेतुता प्रभात्वं सुवर्णादिव्यावृत्तमित्याहुः ॥ सुवर्णादिसंयोगव्यावृत्तवैजात्य
मुपेत्य विजातीयालोकसंयोगत्वेनैव हेतुत्वमित्यपि केचित् ॥ आलोकसंयोगानवच्छे
दकावच्छेदे न चक्षुःसंयोगे घटादिग्रहापत्तिः ॥ तत्रालोकसंयोगस्य चक्षुःसंयो
गस्य च परस्परानवच्छेदकावच्छेदेन सत्त्वादित्याशंकते ॥ तथापीति ॥ तथापि आलो
कसंयोगाद्देहेतुत्वेऽपि परस्यापरदिगवच्छेदेन ॥ तद्दसंयुक्तेति ॥ आलोकासंयुक्ते स
र्थः ॥ पुरुषेणेति ॥ परदिगवच्छेदेन चक्षुःसंयोगवत्त्वेतिशेषः ॥ यद्दवच्छेदेनेति ॥ आलो
कसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वादिति भावः ॥ अथ मूर्त्तयोः समा
नदेशतानाविरोधात् घटादावेकावच्छेदेन संयोगसंबंधेनालोकचक्षुषोरसंभवात् आ

105

॥५३॥

शा २

लोकसंयोगावछेदकावछेदेन चक्षुःसंयोगः कथमुपपद्यते इति चेन्न । निविडचोरेव मू
र्तयोः समानदेशतानंगीकारात् । आलोकचक्षुषोस्तैजसत्वेन निबिडत्वाभावात् । ने
च तथाप्यालोकसंयोगस्य कारणतावछेदककोटिप्रविष्टत्वान्न कारणत्वमिति
वाच्यं । तादृशचक्षुःसंयोगत्वेन चक्षुःसंयोगावछेदकावछिन्नालोकसंयोग
त्वेन वा हेतुत्वमिति विनिगमनाविरहेण तस्यापि कारणत्वात् । न चालोकसंयोगं
विनापि बिडालादेः सांजनचौरादेश्चांधकारे प्रसक्षोदयात् कथं तस्य कारणत्वमि
ति वाच्यं । विजातीयचाक्षुषं प्रसेवालोकसंयोगस्य हेतुत्वात् । बिडालादिसांजनपु
रुषीयचाक्षुषव्यावृत्तं वैजात्यमिति । केचित्तु । अंजनाभावविशिष्टालोकसंयोगा
भावत्वेन द्रव्यचाक्षुषत्वावछिन्नं प्रतिप्रतिबंधकत्वं तदभावत्वेन च कारणता । अंज

॥५३॥

106

नाभावश्चस्वसंयुक्तचक्षुःसंयोगित्वसंबंधावच्छिन्नप्रतियोगिताकःआलोकसंयोगाभा
वेंजनाभाववैशिष्ट्यंचसामानाधिकरण्येन॥आलोकसंयोगाभावश्चस्वसमाना
धिकरणैकत्वसंबंधावच्छिन्नप्रतियोगिताकोबोध्यः॥तेनसंयोगस्याव्याप्यवृत्तित्वे
पिनक्षतिः॥सचविशिष्टाभावःक्वचिद्विशेषणाभावप्रयुक्तःक्वचिद्विशेष्याभावप्र
युक्तः॥सांजनपुंसःअंजनाभावप्रयुक्तोविशिष्टाभावः॥आलोकसंयोगस्थलेचा
लोकसंयोगाभावविरहप्रयुक्तइत्युभयत्रापिप्रतिबंधकाभावसत्वमव्याहतं॥बिडा
लादिचाक्षुषेव्यभिचारवारणायतत्तत्पुरुषीयत्वंनिवेशनीयमित्याहुः॥समवाया
भावग्रहार्थमेवविशेषणताप्रत्यासत्तिरित्युक्तेः तत्तुसमवायाभावयोःप्रमाण
सत्वएवसंभवतिनदैवनेत्याशंकते॥स्यादेतदिति॥समवायाभावग्राहकत्वेनैव

विरह५

तत्र सासन्नित्वं स्यादत आह ॥ समवायेति ॥ प्रमाणसत्वेकथं तयोरसत्वमत आह ॥ नही
ति ॥ तथा च प्रमाणाभावस्य प्रमेयाभावव्याप्यत्वात्तयोरसत्वमिति भावः ॥ ननु अयं घटइ
त्यादिप्रत्यक्षं घटघटत्वयोः संबंधविषयकं ॥ तत्र च समवायातिरिक्तसंयोगादीनां बा
धात्समवायसिद्धिः ॥ तथा चेतरबाधसहकृतप्रत्यक्षप्रमाणस्यैव संभवात्कथं प्रमा
णाभाव इत्याशंकते ॥ अयं घट इत्यादि ॥ ननु समवायातिरिक्तस्यैव कस्यचित्संबंधस्य
सत्वान्नेतरबाध इत्यत आह ॥ नहीति ॥ घटत्वरूपचलनादीनां ॥ अन्यः संबंध ॥ सं
योगादिः ॥ सत्वादिति ॥ तथा च समवायातिरिक्तस्याधाराधेयभावाख्यस्वरूपसंबं
धस्य सत्वात्तद्विषयकत्वेनैव प्रतीतिरूपपत्तेर्न तदन्यथानुपपत्त्या समवायसिद्धि
रिति भावः ॥ नन्वाधारता समवाय इति पर्याय इति सिद्धं समवायेनेसत आह ॥

नहीति ॥ पटाद्यावपीति ॥ सत्वात् ॥ समवायस्य सत्वात् ॥ तथा च समवायस्यैवाधारताद्वे पटाद्य
वपि समवायरूपघटत्वाधारतासत्वेन तत्रापि घटत्वविशिष्टबुध्यापत्तेः ॥ समवायातिरि
क्तैवाधारतास्वीकार्या ॥ तथा च किं समवायेनेति भावः ॥ ननु पटे घटत्वसमवायाभा
वादेव न तथा प्रतीत्यापत्तिरत आह ॥ एकएवहीति ॥ तत्सिद्धेरिति ॥ तथा च समवेत
मिति प्रतीतेः स्वरूपसंबंधविषयकत्वेनोपपादयितुमशक्यत्वात् समवायस्वीकार इ
ति भावः ॥ वस्तुतस्तु ॥ अयं घटइत्यादिप्रतीतीनां अनंतस्वरूपसंबंधविषयकत्वे गौ
रवाल्लाघवेनातिरिक्तसमवायविषयकत्वमिति ध्येयं ॥ समवाये प्रमाणमुक्त्वाऽभावे
तदाह ॥ नचेति ॥ असन्निति ॥ अप्रामाणिक इत्यर्थः ॥ तत्सिद्धेः ॥ अभावसिद्धेः ॥ ननु न
वयं अभावो नास्तीति ब्रूमः किंतु तस्याधिकरणरूपत्वेनैवोपपत्तेरतिरिक्तत्वे माना

॥५५॥

भावइतिप्राभाकरमतमुपदर्शयति॥अत्रप्राभाकराइति॥अतिरिक्तःअधिकरणादतिरिक्तः॥तद्ग्रहायअभावग्रहाय॥प्रसाससत्तीति॥विशेषणतारूपप्रसाससंतरकल्पनेनेत्यर्थः॥यद्यपिसमवायग्रहार्थमवश्यंतत्प्रसासत्तेरंगीकारःतथाप्यभावग्राहकत्वेनतत्प्रसासत्तित्वंयन्नैय्यायिकैःस्वीकृतंतदेवखंडयतइतिभावः॥इदंअभावप्रतीतिविषयीभूतं॥तत्वापत्तिःअभावस्वरूपत्वापत्तिः॥तथाचतत्रापिघटाभाववत्ताबुद्धिप्रसंगइतिभावः॥अभावइति॥अभावाधिकरणतेत्यर्थः॥यत्कालावच्छेदेनघटाभावाधिकरणताभूतलेउपेयतेतस्यैवतत्स्वरूपत्वमंगीक्रियतइतिभावः॥नचाभेदइति॥अभेदेअभावाधिकरणयोरभेदे॥तथाभावः॥आधाराधेयभावः॥अनवस्थापत्तेरिति॥घटाभावेऽतिरिक्ताभाववद्घटाभाववत्सभावेप्यतिरिक्तःक ॥५५॥

स्यते। तथा चानवस्थेत्यर्थः। ननु यद्धर्मविशिष्टे यद्धर्मावच्छिन्नवत्ता न प्रतीयते तद्धर्मावच्छिन्ने
तद्धर्मावच्छिन्ननिरूपिताधिकरणता नोपेयते। एवं च भूतले भूतलत्वावच्छिन्ननिरू
पिताधिकरणत्वाभावात् न भूतले भूतलमिति प्रतीत्यापत्तिः। भूतले घटाभावत्वाव
च्छिन्ननिरूपिताधिकरणतायाः स्वीकाराच्च भूतले घटाभाववदिति प्रतीतिरुपपन्नैवे
त्यस्वरसादाह। किं चेति। आद्ये तदधिकरणस्य घटाभावस्वरूपत्वे। इदानीमि
त्यनंतरमिहेति शेषः। अंत्ये तदधिकरणस्य घटाभावास्वरूपत्वे। अन्यदापीति।
घटे नीतेपीत्यर्थः। नन्वतिरिक्ताभाववादिमते घटे आनीते घटाभावो न नश्यति
न वा गच्छति तस्य नित्यत्वात् अभावत्वाच्चेति कुतो न घटाभाववत्ताबुद्धिः। कथं वा भावाभा
वयोरेकाधिकरणावृत्तित्वरूपो विरोधः। तत्रैवोभयोः समावेशात्। अथ घटान

॥५६॥

धिकरणकालावछिन्नंतत्तद्भूतलादिकमेवघटाभावस्यसंबंधः॥तथाचघटवतिभूतलेते
नसंबंधेनघटाभावस्याविद्यमानत्वान्नघटाभाववत्ताबुद्धिः॥घटाभावस्यतेनेसं
बंधेनअविद्यमानत्वाच्चनविरोधिताघटकसंबंधेनतदधिकरणत्वनिरूप
विरोधव्याघातोपीतिचेत्तर्हिविशिष्टसत्तायाअनतिरेकेपियथाविशिष्टनिरूपि
ताधिकरणतायागुणे असत्वात्तद्गुणेगुणकर्मान्यत्वविशिष्टसत्तावानितिन
प्रत्ययस्तथासघटभूतलेपितत्कालावछेदेनघटाभावाधिकरणतायाअनं
गीकारान्नघटाभाववत्ताबुद्धिप्रसंगइसस्वरसाहाह॥किंचकपालेइति॥केचि
त्तु॥ननुसादिविनाशशालिनीएकाधिकरणतोपेयतेतस्याश्चघटेआनीतेना
न शोपगमेनतत्ताबुद्धिप्रसंगइसस्वरसमाहुः॥तदसत्॥प्रतिक्षणमप्रामाणि ॥५६॥

कानंताधिकरणतानां तन्त्राभ्युपगमे गौरवेण अतिरिक्ताभावस्यैव कल्पयितुमु
चितत्वात् ॥ न च वह्युक्तो प्य दोष इति वाच्यम् ॥ मन्मते घटाभावाधिकरणतायां
घटाधिकरणकालस्यावच्छेदकतानुपगमेनानुपपत्त्यभावात् ॥ स इति ॥ घ
टप्रागभावो ध्वंसश्चेत्यर्थः ॥ सर्व इति ॥ घटप्रागभावनाशकाले ध्वंसानुत्प
त्तिक्षण एवेत्यर्थः ॥ कपालमात्र इत्यर्थ इति कश्चित् ॥ अन्यथा प्रागभावध्वंस
योर्घटकाले सत्त्वेऽपि प्रतीतस्वीकारे ॥ कपालप्रतीतिरपीति ॥ कपालस्वरूप
प्रागभावध्वंसयोरप्रतीतौ कपालमपि कथं प्रतीयेत ॥ त्रयाणामेकस्य नएके
स्याप्रतीतौ न कस्यापि प्रतीतिः स्यात् ॥ कस्यचित्प्रतीतौ सर्वमेव प्रतीये
तेति भावः ॥ अन्यथा कपालासत्त्व इत्यर्थः ॥ इति कश्चित् ॥ न चत्रापि घट

॥५७॥

कालावच्छेदेन घटप्रागभावध्वंसाधिकरणताया अनभ्युपगमात्तत्कालेन दुःखा
बुद्धिरित्यस्वरसादाह ॥ किंच मोक्ष इति ॥ उत्पादविनाशशालिनीमधिकरण
तामंगीकृत्य घटकाले घटप्रागभावाधिकरणतायाः नाशात् ध्वंसाधिक
रणताया अनुत्पत्तेश्च न तद्दुःखाबुद्धिरित्यस्वरसात् किंचेति कश्चित् ॥ ननु
पूर्वमेव दूषितत्वादनादेयं ॥ असाध्यत्वेति ॥ इष्टापत्तौ च श्रवणमननिदि
ध्यासनध्यानधारणासमाधिकृतमनेकविधं दुःखं कोपि नानुभूयादि
तिबोध्यं ॥ ननु नित्यसुखाभिव्यक्तेरेव मुक्तित्वेन असाध्यतापत्तिरित्यत
आह ॥ संक्षेप इति ॥ नैरीश्वरानंगीकारात् ईश्वरीयनित्यसुखमप्रसि
द्धं जीवस्य तु नित्यसुखे प्रमाणाभावेन नित्यसुखाभिव्यक्तिर्मुक्तिः इति

॥५७॥

मुक्तिलक्षणमसंभवि तस्मात् दुःखध्वंसरूपमुक्तेरसाध्यत्वापत्तिरस्त्येवेतिभा
वः दुःखं तु चिरं तन्मते दुःखध्वंसनिरूपिताधिकरणतायोः साध्यत्वं संभव
त्येव मोक्षाधिकरणतायाः साध्यत्वोपगमादिति प्रभाकरमतेन कश्चिद्दोषः
वस्तुतस्तु भूतले घटो नास्ति पर्वते घटो नास्तीति प्रतीतीनामनंताधि
करणभेदेन तत्तदधिकरणस्वरूपाभावविषयकत्वकल्पने गौरवात् ॥ एकाति
रिक्तघटत्वावच्छिन्नप्रतियोगिताकाभावविषयकत्वमेव समुचितं ॥ एवं
घटवत्ताबुद्धिं प्रति घटाभाववत्ताज्ञानत्वेन प्रतिबंधकतायां सघटभूतले
पि यत्किंचिद्घटाभावसत्वात् घटाभावकूटवत्ताज्ञानत्वेन प्रतिबंधकत्वं वाच्यं ॥
तदपेक्षया घटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेन प्रतिबंधकत्वसे

या

५८

वैचित्र्यमित्यादिरीत्यातिरिक्ताभावसिद्धिरितिनिपुणतरमूहनीयं॥तद्भावइति॥
घटाभावाभावस्याप्यभावइत्यर्थः॥केवलाधिकरणमित्याह॥केवलाधिक
रणं॥घटाभावानधिकरणभूतलं॥तद्भावः॥घटाभावाभावः॥सर्वत्रघ
टाभावस्थलेपि॥सएव॥अधिकरणस्वरूपएव॥ननुसर्वत्राधिकर
णस्वरूपत्वेपूर्वंदूषणंदत्तमेवेत्यतआह॥भवदुक्तेति॥एवंघटाभावाभाव
स्याधिकरणस्वरूपत्वे॥तथाचयानिदूषणानिअधिकरणस्वरूपत्वेतयो
क्तानितानितन्मतेपिविशिष्टानीतिभावः॥नत्सत्वे॥घटसत्वेउक्तयुक्तेरि
ति॥आधाराधेयभावानुपपत्तिरूपदूषणादित्यर्थः॥संप्रदायमतेऽस्वर
सद्देवनव्यमतमाह॥नव्यास्त्विति॥अयंअभावत्वेनप्रत्ययः॥बाधकाभावादि॥ ५८

प्रमात्वेबाधकाभावात्॥अन्योन्याभावस्थलेत्वंकते॥स्यादेतदिति॥अंसेभूतलेघटभे
दभिन्नत्वाभावे॥आद्येघटभेदभिन्नत्वे॥तन्नेदेति॥घटभेदभेदोपीत्यर्थः॥भवदु
क्तेति॥आधाराधेयभावानुपपत्तिरूपदूषणप्रसंगादित्यर्थः॥प्रामाणिकत्वादि
ति॥बीजांकुरानवस्थायादृवप्रमाणसिद्धत्वादित्यर्थः॥संक्षेपइति॥घटभेदाभा
वोघटत्वस्वरूपइत्यादिबोध्यं॥सचायमिति॥प्रागुक्तयुक्त्यातिरिक्तत्वेनास्ति
त्वाभावश्चेत्यर्थः॥तत्रप्रथमोद्दिष्टमन्योन्याभावंलक्षयति॥तत्रेति॥प्रतीतिसा
क्षिकइति॥ईदृशप्रतीतिसिद्धमखंडोपाधिरूपमन्योन्याभावत्व[illegible]मेवान्योन्याभा
वलक्षणमित्यर्थः॥प्राचीनोक्तमन्योन्याभावलक्षणंदर्शयति॥यदिदमाहुरित्या
दिना॥नाशास्येति॥घटनाशास्यहिघटत्वंतथाचघटान्योन्याभावबोधेघटत्वेन

117

५९

बंधविधया प्रकारतया च प्रतियोगितावच्छेदकमिति द्विविधतया घटत्वस्य भानं तद्वच्छि
न्नप्रतियोगिताकश्चान्योन्याभाव इति लक्षणसमन्वयः॥ न च संयोगितादात्म्यं संयोग
एवेति संयोगसंबंधावच्छिन्नप्रतियोगिताकसंयोग्यसंताभावे अतिव्याप्तिरि
ति वाच्यं॥ तादात्म्यसामान्यसंबंधावच्छिन्नेति तदर्थात्॥ तादात्म्यत्वविशिष्टत्वमेव हि
तादात्म्यसा[illegible]मान्यत्वं तादात्म्यत्वं च संबंधताविशेषः [illegible]प्रतीतिसाक्षिकः॥ घटत्वा
दिरूपतादात्म्यं तादात्म्यत्वेनैव घटान्योन्याभावप्रतियोगितावच्छेदकमिति लक्ष
णसमन्वयः॥ संयोग्यसंताभावे च संयोगत्वेनैव संबंधत्वं न तु तादात्म्यत्वेनेति नानु
पपत्तिः॥ अत एवं सप्रागभावयोरिवान्योन्याभावस्य प्रतियोगितावच्छेदकसंबंधे मा
नाभावः॥ न चासंताभावस्यापि तथात्वमिति वाच्यम्॥ संयोगसंबंधावच्छिन्नप्रति

५९

योगिताकघटात्यंताभाववत्ताज्ञानेसत्यपिसमवायादिसंबंधेनघटवत्ताज्ञानोदयात्संयो
गसंबंधावच्छिन्नघटनिष्ठप्रकारताशालिज्ञानंप्रतिसंयोगसंबंधावच्छिन्नप्रतियो
गिताकघटाभावप्रकारकज्ञानत्वेनप्रतिबंधकत्वात् अत्यंताभावस्यप्रतियोगिता
वच्छेदकसंबंधावश्यकत्वात् अन्योन्याभावस्यचनानासंबंधावच्छिन्नप्रतियो
गिताकत्वाभावेनसमवायेनघटत्ववत्ताज्ञानंप्रतिघटान्योन्याभाववत्ताज्ञानत्वे
नैवप्रतिबंधकतयान्योन्याभावस्यतथानावश्यकत्वादित्यखंडोपाधिरूपत्वमेवतस्य
सम्यगित्यस्वरसआहेत्यनेनसूचितः॥ तदन्यइति॥ अन्योन्याभावान्यइत्य
र्थः॥ तथाचान्योन्याभावभिन्नाभावत्वंसंसर्गाभावत्वमितितल्लक्षणमितिभावः॥
अत्रयद्यपिनास्तीतिप्रतीतिसाक्षिकोअभावःसंसर्गाभावःतदन्योअभा

वः अन्योन्याभाववद्यपि न कुत्रचित् तथापि नास्तीति प्रतीतेरत्यंताभावत्वविषयक
त्वेनैवोपपत्तेरतिरिक्तसंसर्गाभावत्वे मानाभावान्न तथोक्तौ॥ सोपि संसर्गाभा
वोपि अत्र नास्तीत्यनुभवस्यादि अग्रे च विनष्ट इत्यादि प्रतीतिप्रदर्शनं अत्यंता
भावध्वंसयोः प्रमाणप्रदर्शनाय न तु लक्षणे तन्निवेश इति बोध्यं॥ नि
समात्रोक्तौ गगनादेः संसर्गाभावमात्रोक्तौ च ध्वंसप्रागभावयोरतिव्याप्तिरित्यु
भयोपादानं॥ नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं॥ ध्वंस
स्य प्रागभावप्रतियोगित्वात् प्रागभावस्य च ध्वंसप्रतियोगित्वान्न तत्रातिप्रसंगः॥
एकतरमात्रोक्तौ चान्यतरत्रातिव्याप्तिरिति ध्येयम्॥ उत्पत्तिमानिति॥ उत्पत्ति
मत्त्वमात्रोक्तौ घटादेः अभावत्वमात्रोक्तौ चात्यंताभावादावतिव्याप्तेर्वारणाय भ

ध

योपादानं॥आद्यक्षणसंबंधउत्पत्तिः॥स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्ष
णसंबंधउत्पत्तिरितियावत्॥अध्वस्तक्षणयोगः स्वक्षणयोगो जनिर्मतेति
वा तदर्थः॥स्वाधिकरणक्षणध्वंसानधिकरणक्षणसंबंध एव वा उत्पत्तिरिति
महाप्रलयोगीकर्त्तृम तेतु कचिदपि यदीयसमयसंबंधे यत्समयवृत्तिध्वं
सप्रतियोगित्वं नास्ति तस्य तत्समयसंबंधउत्पत्तिरिति तदर्थः॥स्ववृत्तिप
दार्थप्रागभावानधिकरणत्वं स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वं वा क्षण
त्वमिति बोध्यं॥स च ध्वंसश्च॥ननु प्रतीतिरेव मानमत आह॥नहीति॥ध्वंस
स्य ध्वंसाप्रतियोगित्ववत्प्रागभावाप्रतियोगित्वमपि स्यादिति भ्रमं निराक
र्तुमाह॥तत्प्रागभावश्च॥ध्वंसप्रागभावश्चेत्यर्थः॥अग्रे च प्रतियोगिप्राग

६१

भावएवतत्प्रागभावपदेनग्राह्यः॥अत्रप्रतीतिंप्रमाणयति॥उभयत्रेति॥प्रतियोगि
दृष्टायांप्रतियोगिप्रागभावदृष्टायांचेत्यर्थः॥दृष्टमुपलक्षणं॥ध्वंसप्रागभावान
धिकरणकालस्यप्रतियोग्यनधिकरणत्वनियमेनध्वंसस्यध्वंसस्वीकारेघ
टोन्मज्जनप्रसंगात्ध्वंसस्यनध्वंसः॥एवंघटप्रागभावत्वेकोध्वंसोन्मज्जन
प्रसंगात्घटप्रागभावस्यघटध्वंसप्रागभावरूपत्वेसपिद्धव्यं॥प्रागभावत्व
क्षयति॥विनाशीति॥घटादौअत्यंताभावादौचातिव्याप्तिवारणाययथाक्रमं
विशेषणद्वयोपादानं॥ननुप्रागभावांगीकारेमानाभावइत्यतआह॥सचेति॥
तथाचभविष्यतीतिप्रतीतिविषयतयाप्रागभावावश्यकत्वमितिभावः॥ननु
भविष्यत्वस्यवर्त्तमानप्रागभावप्रतियोगित्वरूपत्वेप्रागभावसिद्धिः॥तदेवन

६१

कालो॰१

किंतुवर्त्तमानोत्तरकालोत्पत्तिकत्वमेवतत्वम्॥नचयत्सामग्र्यव्यवहितोत्तरोयःक्ष
णःसतदुत्पत्तिमानितिसामग्रीव्याप्ते[illegible]घटादिद्वितीयक्षणेघटा
देरुत्पत्तिवारणायप्रागभावहेतुत्वमावश्यकमितिवाच्यम्॥उत्पत्त्यंतर्भावेन
सामग्रीव्याप्तेरनुपगमात्॥अपितुतदधिकरणत्वांतर्भावेनैव॥अस्तुवातथा
तथापिजन्यद्रव्यत्वावच्छिन्नंप्रतिसमवायेनद्रव्यत्वेनप्रतिबंधकत्वोपगमेना
नुपपत्तेरभावात्॥अनंतप्रागभावादिकल्पनामपेक्ष्यैकप्रतिबध्यप्रतिबंधका
भावकल्पनायाएवन्याय्यत्वादितिचेत्॥अत्राहुः॥सहस्रतंतुकपटस्थलेस्वा
नधिकरणतंत्वादौपटोत्पत्तिवारणायतावत्संयोगानांतत्तत्तंतूनांवातत्त
द्व्यक्तित्वेनकारणत्वमपेक्ष्यएकप्रागभावकारणत्वमेवसमुचितं॥प्रागभा

त्वस्य प्रतियोगिसमानदेशत्वनियमेन पटादीनां देशानियमोपपत्तिः॥ न च त्रिचतुरेषु उत्पन्नेषु संयुक्तेषु च तंतुषु तत्पटोत्पत्तिवारणाय तंत्वेतूनां तत्तत्संयोगानां वा
हेतुत्वमावश्यकमिति वाच्यम्॥ चरमतंतुसंयोगव्यक्तेरेव तत्तद्व्यक्तित्वेन हेतुत्वोपगमात्॥ चरमसंयोगानधिकरणतंतावपि तत्पटोत्पत्ति तद्धिरहेण तं
त्वंतरे तत्पटोत्पादनवारणासंभवात् प्रागभावस्वीकारस्यावश्यकत्वात् चरमसंयोगस्य च तत्पटं प्रति समवायेन न हेतुता॥ चरमसंयोगानधिकरणतंतौ
वपि तत्पटोत्पत्तेः॥ किंतु समवायसंबंधेन तत्पटं प्रति कालिकसंबंधेन चरमसंयोगो हेतुरित्यलमप्रकृतविचारेण॥ तस्य चेति॥ प्रागभावस्य चेत्यर्थः॥
तद्ध्वंसश्चाप्रतियोगिध्वंसश्च॥ प्रतीतिं प्रमाणयति॥ उभयत्रेति॥ प्रतियोगि

दन्तायां प्रतियोगिध्वंसदन्तायां चेत्यर्थः॥ इदमुपलक्षणं प्रागभावोन्मज्जनप्रसंगोपि द्रष्टव्यः॥
निरसाविति॥ निरसत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं ग्राह्यं॥ अ
त एव चन ध्वंसप्रागभावयोर्विभागविघात इति भावः॥ प्रसंगाद्व्यासज्य वृत्ति
धर्मावच्छिन्नप्रतियोगिताकाभावमतिरिक्तं साधयितुं प्रणालीमारभते॥ नित्य
श्चेत्यादिना॥ एकमात्रेति॥ एकमात्रपर्याप्तवृत्तिकेत्यर्थः॥ अन्यश्चेति॥ एकमात्रा
पर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगिताकश्चेत्यर्थः॥ न चासौ॥ एकमात्रापर्याप्तवृ
त्तिकधर्मावच्छिन्नप्रतियोगिताकाभावो॥ घटवतीत्यादिप्रतीतेर्द्वयप्रदर्शनमसंता
न्योन्याभावभेदेन॥ घटवतीति॥ व्यासज्यवृत्तिधर्मावच्छिन्नाभावानभ्युपगमे ता
दृशप्रतीत्यनुपपत्तिरिति भावः॥ न च तादृशप्रतीतेः पटाभावविषयकत्वेनैवो

वे॰

६२ प्र

पपत्तेर्नातिरिक्ताभावसाधकत्वमिति वाच्यम्॥ तथा सति किंचिद्घटाभावः क्वचिच्च पटा
भावो विषय इति ताहृत्वानुगतप्रतीत्यनुपपत्तेः॥ अनुगतं [illegible] विनाऽनुग
तैस्याभावात्॥ नन्वायातु हि [illegible] त्वावच्छिन्नप्रतियोगिताकाभावस्तथापि कूप्ता
नामेव द्वित्वसमानाधिकरणघटत्वपटत्वावच्छिन्नप्रतियोगिताकाभावानां
प्रतियोगितावच्छेदकं तदुपेयतां॥ तथा च तत्स्यातिरिक्तत्वे मानाभाव एवेत्यत आ
ह॥ एकघटवतीति॥ घटौ न स्त इति प्रतीतेर्यदि घटप्रतियोगिकाभावो विषय
स्तर्हि घटद्वयवत्यपि यत्किंचिद्घटप्रतियोगिकाभावसत्वात्तादृशप्रतीत्यापत्तिः॥
यदि च घटत्वावच्छिन्नाभावो विषयस्तदा एकघटवत्यपि घटौ न स्त इति प्रती
त्यनुपपत्तिरिति अनायत्या [illegible] तिरिक्ताभावोऽभ्युपेयत इति भावः॥ ननु तद्घटवति

अ

प.मैर

घ४

६२

वतिर

तद्घटान्यघटत्वावच्छिन्नाभावो घटांतरे च तदन्यघटत्वावच्छिन्नाभावो विषयो वक्तुं शक्य
त एवेति चेन्न ।। तथाप्यनुगतधर्मं विनानुगतप्रतीतेरुपपादयितुमशक्यत्वमि
त्यादेः प्रागेव निवेदितत्वात् ।। ननु यत्किंचिद्द्वयवृत्तिः पटो नस्त इति प्रतीतेर्द्वित्वसा
मान्यं न प्रतियोगितावच्छेदकम् ।। तथाविधयत्किंचिद्द्वयत्वेन तदवच्छिन्नाभा
वासंभवो नापि द्वित्वविशेषः ।। तत्तद्द्वित्वेनानुपस्थितेः केवलघटादिमत्य
पि तथा प्रत्ययेनुप्रत्येकं घटत्वपटत्वादिकमपि न तथेति त्वन्मतेपि अनुगतप्रत्य
योऽनुपपन्न एवेति चेन्न ।। द्वित्वं द्वित्वधर्मितावच्छेदकीभूतं घटत्वं पटत्वं च त
था ।। प्रतियोगितावच्छेदकताचात्र व्यासज्यवृत्तिर्नास्त्येव ।। प्रतियोगितावच्छे
दकावच्छिन्नत्वं च घटपटौभयमिति नानुपपत्तिलेशोपीति ध्येयम् ।। नयोरिति ।।

द्वा

घट२

६४

प्रतियोग्यभावयोरेकाधिकरणावृत्तित्वरूपविरोधादित्यर्थः॥ नन्वेकस्मिन्नपि
समवायेन द्वित्वमस्त्येवेत्यत आह॥ एको द्वाविति॥ एकस्मिन्समवायेन द्वित्वमे
स्यसत्वेन एको द्वाविति प्रतीत्यापत्तिरतः समवायेन तत्सत्वेपि पर्याप्तिसंबंधेन
तदसत्वान्न तथा प्रतीतिरित्युपेयम्॥ एवं च प्रतियोगितावच्छेदकपर्याप्त्यधि
करणे नैवाभावस्य विरोधान्न तदनुपपत्तिरिति भावः॥ प्रतियोगितावच्छेद
कावच्छिन्नेनैवाभावस्य विरोधात्प्रतियोगिमत्यपि तदतिरिक्तविशिष्टाभावो
विरुद्ध इत्याह॥ अत एवेति॥ प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधा
देवेत्यर्थः॥ इयं॥ दण्डी पुरुषो नास्तीति धीः॥ तस्याः पुरुषस्य॥ न च क्वचिद्दण्डाभा
वः क्वचिच्च पुरुषाभावो विषय इति वाच्यम्॥ विषयाऽननुगमे विनाऽननुगते प्रती

छिद्र

६४

स्यनुपपत्तिरित्यस्यासङ्गतत्वेऽपि तत्वात्॥ ननु आपातूपदर्शितरीत्याऽतिरिक्तोऽभावस्त
थापि तद्ग्राहिकानविशेषणतापि सासत्तिः॥ किंतु चक्षुरादिनावेन्यादिज्ञानासंभवा
त् यथानुमानादेः प्रमाणांतरत्वं तथाभावग्राहकप्रमाणांतरस्वं तथाभावग्रहेकूप्तानां संयोगादिसन्निकर्षाणा
मभावेन इंद्रियादेर्ग्राहकत्वासंभवात् प्राप्तस्येंद्रियस्य ग्राहकत्वात्॥ अन्य
था निमीलितनयनस्यापि घटादिग्रहापत्तिरित्यनुपलब्ध्याख्यप्रमाणांतर
मभावग्राहकमेषितव्यं॥ न च विशेषणतैव सन्निकर्षः॥ तस्यास्तत्वेन अक्लृप्त
त्वात्॥ समवायानंगीकारेण समवायग्राहकत्वेनाक्लृप्तत्वाच्च॥ तथा च घ
टाभावस्य अनुपलब्धिरूपप्रमाणजन्यमनुपलब्धमेव ज्ञानं न तु साक्षात्कारः
साक्षात्कारत्वस्येंद्रियजन्यत्वव्याप्यत्वात्॥ न चैवं निमीलितनयनस्यापि घटाभा
वग्रहापत्तिः॥ सद्भाममभावो निरूप्यत इति नियमात्॥ अभावग्रहे अधिकरणग्र

६५

त्यक्षस्यजनकतयातज्ज्ञानार्थमिंद्रियापेक्षणात्॥अतएवतज्ज्ञानकतयाऽन्यथासिद्धमिंद्रि
यंनाभावग्रहेहेतुः॥नचाधिकरणप्रत्यक्षस्यव्यापारतयातेनतदन्यथासिद्धिः॥व्या
पारेणव्यापारिणोऽन्यथासिद्ध्यसंभवात्॥अन्यथाचक्षुःसन्निकर्षेणचक्षुषोप्यन्यथा
सिद्धिरितिवाच्यं॥इंद्रियस्यजनकत्वभवेऽधिकरणप्रत्यक्षस्यतद्व्यापकत्वंतदेवनाकू
प्रसंनिकर्षाभावात्॥एवंअनुपलब्धिप्रमाणस्यापिसत्वाच्छ्रद्वार्यंवप्रमाणानीस
संगतमितितैभट्टमतं+निष्कृष्य+पूद्दूषयितुंतन्मतमुपन्यस्यति॥भट्टास्तित्वादि
नानेंद्रियग्राह्यः॥नेंद्रियजन्यलौकिके साक्षात्कारविषयः॥कुतःसन्निकर्षाणांसंयोगा
दिपंचानांसन्नि कर्षाणामभावात्॥अभावेऽसंभवात्॥ ननुतर्हिअभावग्रह
नुपपत्तिरतआह॥किंत्विति॥इंद्रियप्रमाणांतरजन्यज्ञाने चनसन्निकर्षापेक्षेति
नेंद्रियसम ते तिभावः॥प्रमाणांतरेति॥धर्मिकल्पनातोधर्मकल्पना[illegible]याल

६५

धीयस्त्वमिति न्यायात् अनुपलब्धेर कूप्तविजातीयप्रमांप्रतिकरणाहंकल्पनमपेक्ष्य कूप्तप्रत्य
क्षप्रमाहेतुतया विशेषणतारूप संनिकर्षकल्पनमेव लघीय इत्यर्थः॥ तथा च इंद्रिये
णैव तद्ग्रह इति भावः॥ अन्यथेति॥ सन्निकर्षकल्पनयोपपत्तावपि प्रमाणांतरकल्पने इ
त्यर्थः॥ अन्यथा सन्निकर्षांतराकल्पने इत्यर्थ इति सपि कश्चित्॥ कूप्तानां संयोगादि
त्रयाणां सन्निकर्षाणामित्याशंकते॥ तत्रेति॥ प्रत्यक्ष एवाप्रत्यक्षविषय एव वा अयं
ग्राह्यः॥ तथा च जन्यसाक्षात्कार [illegible] त्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतुतयाक्लृप्तेपि
सन्निकर्षकल्पनं नावश्यकम्॥ सन्निकर्षत्वं च संयोगाद्यन्यतमत्वमिति भावः॥
अध्यक्ष एव सन्नंतरं अभाव इति शेषः॥ तथा चात्राप्यभावग्रहार्थं सन्निकर्षापेक्षणं
नावश्यकमिति भावः॥ ननु शांकरेपि प्रमाणांतरापत्ते रित्युक्तं प्रतिवदेरनुत्तरत्वादि

सस्वरसाद्दाहा॥ किंचेति॥ ननु व्यापाराभावेपि फलायोगव्यवच्छिन्न कारणत्वरूपकरण
त्वमुपपद्यत एव अत एव साधकतमं करणमिति सूत्रमपीसं हा॥ व्यापारवदिति॥ नि
मीलनदशायामंधकारे च चक्षुषापि फलायोगात् स्वेतरयावत्कारणसमवधा
नेयद्व्यवहितोत्तरक्षणे कार्योत्पत्तिः तत्त्वमेव फलायोगव्यवच्छिन्नत्वं वाच्यं एतस्य
च यावत्कारणघटिततया गुरुत्वेन व्यापारवत्कारणत्वस्यैव करणत्वरूपत्वौचित्ये
नानुपलब्धेः प्रमाकरणत्वं व्याघात इति भावः॥ उक्तमिति उक्तप्रायमित्यर्थः॥ व
स्तुतस्तु॥ धर्मिकल्पनातो न्यायेनैव सन्निकर्षकल्पनं न तु प्रमाणांतरकल्पनमिति पूर्वो
क्तयुक्तिरतिरमणीयेति हृदयं॥ अनुपलब्ध्याख्यप्रमाणानंगीकारे घटाभाव
वति घटभ्रमदशायां घटाभावसत्वात् इंद्रियसंबद्धविशेषणतया घटाभावप्रत्यक्षा
पत्तिः॥ मन्मते च घटोपलंभसत्वे नानुपलब्धेरभावात् नेतद्यापत्तिः॥ रिसनापसाप्रमा

त्वांतरकल्पनमावश्यकमित्याशयेन मीमांसकः शंकते॥ नन्वेवमिति॥ एवमुक्ते अनुपलब्ध्याख्य
प्रमाणमनंगीकृत्य इंद्रियसंबद्धविशेषणतायाः प्रत्यासत्तित्वे योग्यानुपलब्धेरपीति॥
चक्षुषा घटाभावप्रत्यक्षे जननीये भवतामतिरिक्तप्रमाणत्वेनाभ्युपगतायाः योग्या
नुपलब्धेः सहकारित्वं कल्प्यते॥ घटाभाववति च घटोपलंभेन योग्यानुपलब्ध्या भा
वादेव न घटाभावप्रत्यक्षापत्तिरिति भावः॥ नन्वेवं किमत्र द्विष्टमनुपलब्धेः प्रमाण
त्वेन प्रसुप्त इंद्रियस्य कारणत्वे विशेषणतारूपप्रत्यासत्तिकल्पनमधिकमिति चेन्न।
विजातीयप्रमाकल्पनापेक्षया प्रत्यासत्त्यंतरकल्पनाया न्याय्यत्वाद्व्यापाराभावेन
प्रमाणत्वासंभवस्य पूर्वमेव दर्शितत्वाच्चेति॥ अभावग्रहो॥ अभावलौकिकप्रत्यक्षे।
अथ केयमिति॥ द्रव्य अभावग्रहहेतुः॥ योग्यस्य अनुपलब्धिरिति वा योग्यअ

नुपलब्धेरितिवा योग्यानुपलब्धिग्राह्यार्थः॥ तत्राद्यमाशंकते॥ योग्यस्येति॥ ननु परमाणौ
विति॥ महत्वाभावप्रसंक्षानुरोधेन विजातीयचक्षुःसंयुक्तविशेषणताया अवश्यमं
गीकार्यतया पृथिवीत्वाभावस्यापि ग्रहापत्तिरिति भावः॥ दूषणांतरमाह॥ स्तंभेइति॥
द्वितीयमा[illegible]शंक्य निराचष्टे॥ अथ योग्येति॥ सैकदेशिमतं दूषयितुं तन्मतमुप
न्यस्यति॥ यद्विति॥ वायाविति॥ वायोरयोग्यत्वादिति भावः॥ परमाणौ महत्वेदृग्रह
नापत्तेश्चेत्यपि द्रष्टव्यं॥ अनुभवेति॥ वायुर्न रूपवान् परमाणुर्न महान् इत्यादि
प्रत्यक्षप्रतीतीनां विलोपप्रसंगादित्यर्थः॥ योग्या चासावनुपलब्धिश्चेति कर्म
धारयमभिप्रेत्याह॥ अत्रोच्यते॥ योग्येत्यस्य विवरणं सहकारीति॥ तथा च अभा
वप्रत्यक्षसामग्रीविशिष्टा सति योग्यानुपलब्धिरेव योग्ये सत्यनुपलब्धिग्राह्यार्थः॥

अत एव सहकारिसंपन्नत्वविशेषणं देव॥ योग्येति॥ योग्यसन्निकर्षस्यैव अभावप्रत्य
क्षसामग्रीघटकत्वेन परमाणौ न पृथिवीत्वाभावग्रह इति भावः॥ ननु महत्वोद्भूत
रूपवद्विशेषणतायाः पृथिवीत्वाभावग्राहकत्वेपि नोद्भूतरूपाभावग्राहकत्वं उ
द्भूतरूपाभाववति वायौ तस्या असंभवादिति॥ तत्रेंद्रियसंबद्धविशेषणताया एव यो
ग्यसन्निकर्षत्वमुपेयम्॥ एवं च मनस्यपि उद्भूतरूपाभावप्रत्यक्षं स्यादित्यत आह॥ उ
द्भूतरूपाभावे त्विति॥ उद्भूतरूपाभावग्रहे त्वित्यर्थः॥ तथा च प्रकृते रूपमनिवेश्य म
हत्वं निवेशनीयमिति भावः॥ अतः महत्वविशेषणम्॥ तद्ग्रहः॥ उद्भूतरूपाभाव न
ग्रहः॥ वायावित्यत्र तद्ग्रह इत्यनुषज्यते॥ ननु महत्वाभावग्राहकः कः सन्निकर्षः।
एवं गुणादौ पृथिवीत्वाभावप्रत्यक्षानुपपत्तिः॥ तत्रेंद्रियसन्निकृष्टमहत्वादिमद्वि

135

शेषणताविरहात्॥ एवं अन्योन्याभावग्राहकः योग्यः सन्निकर्षः क इत्यत आह॥ एवमन्
त्रापीति॥ महत्त्वाभावादाववपीत्यर्थः॥ सन्निकर्ष इति॥ महत्त्वाभावे इंद्रियसन्निकृष्टो
द्भूतरूपवद्विशेषणता योग्यः सन्निकर्षः गुणादौ पृथिवीत्वाभावग्राहक इंद्रियसन्नि
कृष्टविशेषणतैव योग्यः सन्निकर्षः अन्योन्याभावे तु पृथिवीभेदादौ इंद्रियसन्निकृष्ट
महत्त्वादिमद्विशेषणता योग्यः सन्निकर्षः॥ ननु कुत्रचिदिंद्रियसन्निकृष्टमह
त्त्वादिमद्विशेषणता कुत्रचिदिंद्रियसन्निकृष्टविशेषणता योग्यः सन्निकर्ष इ
त्यत्र किं नियामकमत आह॥ कार्यवशादिति॥ तत्र तत्र तत्तदभावग्रहानुरोधादि
त्यर्थः॥ ननु पिशाचात्यंताभावादीनामपि प्रत्यक्षापत्तिस्तत्र योग्यसन्निकर्षसत्वेन यो
ग्यानुपलब्धिसत्वादित्यत आह॥ पिशाचात्यंताभावस्त्विति॥ अयोग्यत्वादिति॥

प्रसक्ते विषयस्य हेतुतयाऽभावप्रसक्तेर्योग्याभावत्वेन हेतुत्वोपगमादिति भावः ॥ अयोग्यप्र
तियोगिकस्यापि स्तंभे पिशाचभेदस्य प्रसक्तेः स्यादत असंताभावे एव पृच्छति ॥ कथं तु न
रसंताभावे योग्यतेति ॥ उत्तरमत्रैव बोध्यं ॥ योग्यमात्रेति ॥ पिशाचस्यायोग्यत्वेन यो
ग्यमात्रप्रतियोगिकत्वाभावादेव न तदभावप्रसक्तमिति भावः ॥ घटपिशाचान्यतराभाव
वारणाय मात्रेति ॥ अतीन्द्रियावृत्तिप्रतियोगिताकत्वमिति तदर्थः ॥ ननु वायो रूपसामा
न्याभावप्रसक्षानुपपत्तिः तस्यातीन्द्रियरूपप्रतियोगिकत्वेन योग्यमात्रप्रतियोगिकत्वा
भावात् ॥ एवमेतद्गुरुत्ववत्संताभावप्रसक्षापत्तिश्चेत्स्वरसादाह ॥ योग्यधर्मेति ॥ पि
शाचत्वघटपिशाचान्यतरत्वादीनां योग्यधर्मत्वाभावेन न तदवच्छिन्नाभावप्रसक्षमिति
भावः ॥ वस्तुतस्तु ॥ योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताकत्वम् विशेषण
मिसेव पाठः ॥ योग्यमात्रप्रतियोगिकेऽभावे योग्यधर्मावच्छिन्नप्रतियोगिताकत्वविशेष

६९

लंयोग्यत्वेत्यर्थः॥ योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं योग्य
तेति यावत्॥ तत्र च भूतले द्रव्यसामान्याभावप्रत्यक्षवारणाय योग्यमात्रप्रतियोगिकत्वेति।
एतन्मुरूत्ववदसंताभाववारणाय योग्यधर्मेति॥ वायोरूपसामान्याभावप्रत्यक्षं नेष्य
तएवेति तद्संग्रहो न दोषाय॥ एतद्रूपएतन्मुसामान्यतेरावच्छिन्नाभाववारणाय च
योग्यधर्मेत्यस्य योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थ इत्यवधेयम्॥ ननु
पिशाचवदन्योन्याभावोप्ययोग्यत्वादेव न गृह्यत इति वाच्यम्॥ तत्रान्योन्याभावे का यो
ग्यता न तावद्योग्यप्रतियोगिकत्वं स्तंभे पिशाचभेदग्रहानापत्तेः पिशाचवद्रूद्ग्र
हापत्तेश्चेत्यत आह॥ एवमन्यत्रापीति॥ अन्योन्याभावेपीत्यर्थः॥ अनुभवानुसा
रेणेति॥ तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वमेव तत्तदन्योन्याभावयोग्यत्वमित्यर्थः॥
अत एव कापुनरसंताभावे योग्यतेति सामान्यत एवासंताभावे योग्यता निरुक्ता॥

ता४

६९

अन्योन्याभावे तु अननुगतैव सेति ध्येयम्॥ सर्वैति॥ अत्यंतान्योन्याभावद्वयमित्यर्थः॥ तत्किमि
ति। अत्यंताभावे योग्यमात्रे साहि रूपा अन्योन्याभावे तत्तद्न्योन्याभावत्वमित्येवं रूपा
नानैव अभावे योग्यतेत्यर्थः॥ ओमिति अंगीकारार्थकमव्ययम्॥ गुणयोग्येवादित्ता
ति॥ यथा रूपरसादौ तत्तदिंद्रिययोग्यत्वं नैकं तथा प्रकृतेपीत्यर्थः॥ केचित्तु॥ वि
जातीयचक्षुःसंयोगविशेषणताया अभावव्याहकत्वेन परमाणौ न पृथिवीत्वाभाव
ग्रहः पिशाचात्यंताभावादि प्रत्यक्षवारणं तु गुरुत्वादिवत्ताहात्म्येन तत्तदभावत्वेन
साक्षात्कारं प्रति प्रतिबंधकत्वांगीकारेणेत्याहुः॥ तदसत्॥ परमाणौ महत्वाभावप्र
त्यक्षानुरोधेन विजातीयचक्षुःसंयोगस्य आवश्यकत्वात्तेन तत्र पृथिवीत्वा
भावप्रत्यक्षवारणासंभवात्॥ पूर्वोक्तं चक्षुरादिकं लक्षयितुं पृच्छति॥ किमि [illegible]मि
ति॥ तैजस[illegible]मिति॥ आलोकघ्राणादावतिव्याप्तेः यथायथमुभययोपादानं॥ चक्षुष

७०

स्वक्षा

तैजसत्वे विवादादाह ॥ रूपग्राहकमिति ॥ रूपग्राहकत्वमात्रोक्तौ मनस्यतिव्याप्तिरतो म
हदिति ॥ महत्त्वमात्रोक्तौ घ्राणादावतिव्याप्तिः रणाय रूपग्राहकं महदित्युक्तावपि आ
लन्यतिव्याप्तिरत इंद्रियमिति ॥ अत्र केचित् ॥ चक्षुः प्राप्यकारित्वे चंद्रमसो ग्रह
णानुपपत्तेः ॥ शाखाचंद्रमसोस्तुल्यकालग्रहणानुपपत्तेश्च अप्राप्यकार्येव त
द्वाच्यम् ॥ एवं चाप्राप्यकारित्वाविशेषात् गोलकमेव तदिति पार्थिवत्वमेव तस्य
साहुः ॥ तदसत् ॥ च षः अप्राप्यकारित्वे निमीलितनयनस्यापि चाक्षुषाप
त्तेः प्राप्यकार्येव तद्वाच्यम् ॥ चक्षुषस्तैजसत्वेन अतिशीघ्रगामितया चंद्रमसा
संयोग उपपद्यते ॥ शाखाचंद्रमसोस्तुल्यकालग्रहणं तु सिद्धमया युगपच्छ
तपत्राणि छिन्नानीतिवत् ॥ तथा च गोलकस्य घटादौ संयोगाभावेन अतिरिक्तं

षः

७०

तैजसं चक्षुः स्वीकार्यमिति॥ एवमग्रत्रापि बोध्यम्॥ वायवीयमिति॥ वायवीयत्वमात्रं वायोरिं
द्रियत्वमात्रं चक्षुरादौ अतिव्याप्तमिति [illegible]मिलितोपादानं॥ त्वचो वायवीयत्वे विवादादाह॥
स्पर्शग्राहकमिति॥ चक्षुर्मनआत्मनां वारणाय विशेषणत्रयोपादानम्॥ आप्यमिति॥
जलचक्षुरादावतिव्याप्तिवारणाय विशेषणद्वयोपादानं॥ रसनस्याप्यत्वे विवादादाह॥
रसग्राहकमिति॥ चक्षुर्मनआत्मनां वारणाय यथायथं विशेषणत्रयोपादानं॥ पार्थि
वमिति॥ व्यावृत्तिः पूर्ववत्॥ इंद्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानका
रणमनःसंयोगाश्रयत्वं॥ आत्मन्यतिव्याप्तिवारणाय सत्यंतं निवेशः॥ शब्दरूपविशेष
शेष
गुणसत्त्वाच्छ्रोत्रे व्याप्तेः शब्देतरेति विगुणविशेषणम्॥ चक्षुषि तादृशरूपस्य सत्त्वा
दुद्भूतेति॥ उद्भूतत्वं च नीलत्वादिव्याप्यो नानुद्भूतत्वाभाववत्कूटवत्त्वमेव तस्य च संयोगा ना
दिसाधारण्यं तया चक्षुरादाव्याप्तेर्विशेषेति॥ चक्षुष्ट्वादेः सत्त्वान्न गुणेति॥ कालादा

वतिव्याप्तेर्ज्ञानकारणेति॥ इंद्रियावयव संयोगस्यापि प्रत्यक्षकारणतया इंद्रियावयवेऽति
व्याप्तिवारणाय मनःसंयोगेति॥ श्रोत्रं लक्षयति॥ कर्णेति॥ घटावच्छिन्ननभसोपि श्रोत्र
त्वापत्तेः कर्णशष्कुलीति॥ नभसः श्रोत्रत्वे विवादाहाह॥ शब्दग्राहकमिति॥ मनो लक्षय
ति॥ निस्पर्शमिति॥ मनो वै भववादि मीमांसकानां मतं दर्शयति॥ अत्र मीमांसका इति॥
अणुत्वाभावे सिद्धेपि न विभुत्वसिद्धिरत आह॥ किंत्विति॥ निस्पर्शत्वगुणाश्रयभि
चारीति द्व्यणुकादिद्रव्यत्वं घटादौ व्यभिचारीति विशिष्य हेत्वनुधावनम्॥ ननु तन्मते मन
स्त्वस्य निस्पर्शाणुत्वरूपत्वासंभवेन पक्षतावच्छेदकासिद्धिरत आह॥ मनस्त्वं चेति॥
आत्मनि अतिव्याप्तिवारणाय आत्मान्यत्वे सतीति॥ संयोगाश्रयत्वं कालादावपीति ज्ञा
नासमवायिकारणेति॥ चक्षुर्मनोयोगस्य ज्ञानकारणत्वात् ज्ञानकारणसंयोगा
श्रयत्वं च चक्षुरादावतिव्याप्तमिस्यत असमवायीति॥ ज्ञानासमवायिकारणत्वं आत्म

दा।

७१

मनः संयोग एवेति नातिव्याप्तिः॥ केचित्तु नवीनमते अद्दष्टविशेषाकृष्टत्रुटेर्मनस्त्वेन पक्षताव
च्छेदकस्यैक्याभावात् कथं पक्षतावच्छेदकावच्छेदेनानुमितिः त्रुटौ विभुत्वस्य बाधेन कथं
वा तत्र विभुत्वानुमितिरत आह॥ मनस्त्वे चेति॥ ज्ञानासमवायिकारणेति॥ पुरुषांत
रीयात्मप्रत्यक्षवारणाय तत्तदात्ममानसत्वावच्छिन्नं प्रति तत्तदात्ममनःसंयोगत्वेन
हेतुतायां अनंतत्रुटीनां अवच्छेदककोटौ निवेशे गौरवेण लाघवेनैकमनःसिद्धिः॥
न च विजातीयसंयोगत्वेन तस्य हेतुतया नं तत्र मनसो निवेश इति वाच्यं॥ तथापि सम
वायेन विजातीयसंयोगस्य विजातीयसंयोगसंबंधेन मनसो वा हेतुत्वमिति विनि
गमनाविरहादिति भावः इत्याहुः॥ विभुत्वे मनसो विभुत्वे संयोगानुपपत्तिरिति॥ तथा
चोपदर्शितानुमाने पक्षतावच्छेदकासिद्धिर्बाधश्चेति भावः॥ कर्मजः॥ यथा हस्तक्रिय

यारयेन वृक्षसंयोगः॥ अवयवसंयोगजः॥ कारणाकारणसंयोगात्कार्याकार्यसंयोगः॥
यथा हस्ततरुसंयोगात्कायतरुसंयोग इत्यर्थः॥ न च विभोरिति॥ मूर्त्तेतरद्रव्यत्वे वि
भुत्वं स्पर्शत्वावच्छिन्नं प्रतिमूर्त्तत्वेन कारणतया मूर्त्तत्वाभावेन आत्मनि न कर्मोत्पत्ति
रिति भावः॥ अनयोः। आत्ममनसोः सत्संयोगजः अवयवसंयोगजः॥ मानाभावादि
ति॥ नित्यसंयोगग्राहकप्रत्यक्षादेरभावात् अनुमानस्य च अप्रयोजकत्वादित्य
र्थः॥ साधकाभावमुक्त्वा बाधकमप्याह॥ संयोगत्वावच्छेदेनेति॥ संयोगत्वावच्छि
न्नं प्रति द्रव्यत्वेन हेतुतायां तत्कार्यतावच्छेदकं जन्यसंयोगत्वमेव नित्यसंयोगांगीकर्त्ते
वाच्यं॥ कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वात्॥ तथा च जन्यत्वनिवेशे गौरवमे
वतत्स्वीकारे प्रतीकूलतर्क इति भावः॥ ननु समवायेन रूपं प्रति सामानाधिकरण्यसंबंधेन
अवयवरूपादीनां हेतुतया कपालगंधादावपि रूपोत्पत्त्यापत्तेर्जन्यसत्त्वावच्छिन्नं प्रति द्र

व्यत्वेन हेतुतावच्छेदकतया संयोगत्वावच्छिन्नं प्रति न हेतुत्वे मानाभाव इति न द्रव्यत्वं गौरवग्रसि
स्यत आह॥ अप्रयोजकमिति॥ पक्षानित्यत्ववृत्तिधर्मस्यापि कार्यतावच्छेदकत्वे क्षतिवि
रहादत आह॥ अप्रयोजकं चेदमिति॥ इदं विभुत्वसाधकमनुमानमित्यर्थः॥ अनु
कूलतर्काभावादिति भावः॥ संयोगत्वावच्छेदेनेति॥ संयोगत्वस्य जन्यद्रव्यत्वव्याप्य
त्वेन नित्यसंयोगः स्वीकारे तादृशनियमभंगप्रसंगादिति भावः॥ ननु तादृशनियमे
मानाभाव इत्यत आह॥ अप्रयोजकं चेत्यपरे॥ नानातर्कविचारलौकमतिन्नायकिं
चिदुक्तं मयात्र कुं तु हृदा विभाव्य सुधियः सारार्थसंग्राहकाः॥ हृद्येतद्यदि
धारयेदपि जनः संजायते सोऽचिराद्वादीन्द्रः परवादिदर्पदलनाज्ञाताधानैकदक्षः कृती॥
॥ इति श्रीविद्वन्मुकुटमाणिक्यराजिनीराजननीराजितपदद्वंद्वन्यायवागीशश्रीदीक्षि
तश्रीकंठशर्मविरचितायां न्यायसिद्धांतमंजरीदीपिकायां प्रत्यक्षखंडः समाप्तः॥ छ॥ छ॥

तर्कप्रकाशस्यप्रत्यक्षखंडः समाप्तः॥

[OrderDescription]
,CREATED=02.07.20 16:32
,TRANSFERRED=2020/07/03 at 10:32:41
,PAGES=146
,TYPE=STD
,NAME=S0003261
,Book Name=M-1855-NYAYSIDHANT MANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF

FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF

FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF

FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF

FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,